२१ सप्तम्युताप्योर्बाढे।
२२ सम्भावनेऽलमर्थे तदर्थानुक्तौ।
२३ अयदि श्रद्धाधातौ नवा।
२४ सतीच्छार्थात्।
२५ वर्त्स्यति हेतुफले।
२६ कामोक्तावकच्चिति।
२७ इच्छार्थे सप्तमीपञ्चम्यौ।
२८ विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्नप्रार्थने।
२९ प्रैषाऽनुज्ञावसरे कृत्यपञ्चम्यौ।
३० सप्तमी चोर्ध्वमौहूर्त्तिके।
३१ स्मे पञ्चमी।
३२ अधीष्टौ।
३३ कालवेलासमये तुम्वाऽवसरे।
३४ सप्तमी यदि।
३५ शक्तार्हे कृत्याश्च।
३६ णिन्चाऽवश्यकाधर्मण्ये।
३७ अर्हे तृच्।
३८ आशिष्याशीःपञ्चम्यौ।
३९ माङ्यद्यतनी।
४० सस्मे ह्यस्तनी च।
४१ धातोः सम्बन्धे प्रत्ययाः।
४२ भृशाभीक्ष्ण्ये

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिस्वौ यथाविधि
तध्वमौ च
तद्युष्मदि।

४३ प्रचये नवा सामान्यार्थस्य।

४४ निषेधेऽलंखल्वोः क्त्वा।

४५ परावरे।

४६ निमील्यादिमेङस्तुल्यकर्तृके।

४७ प्राक्काले।

४८ णम् चाभीक्ष्ण्ये।

४९ पूर्वाग्रे प्रथमे।

५० अन्यथैवंकथमित्थमः कृगोऽनर्थकात्।

५१ यथातथादीर्ष्योत्तरे।

५२ शापे व्याप्यात्।

५३ स्वाद्वर्थाददीर्घात्।

५४ विदृग्भ्यः कार्त्स्न्ये णम्।

५५ यावतो विन्दजीवः।

५६ चर्मोदरात्पूरेः।

५७ वृष्टिमाने ऊलुक्चास्य वा।

५८ चेलार्थात् क्नोपेः।

५९ गात्रपुरुषात्स्नः।

६० शुष्कचूर्णरूक्षात्पिषस्तस्यैव।

६१ कृग्ग्रहोऽकृतजीवात्।

६२ निमूलात्कषः।

६३ हनश्च समूलात्।

६४ करणेभ्यः।

६५ स्वस्नेहनार्थात्पुष-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिषः ।

६६ हस्तार्थाद्ग्रहवर्त्ति-वृतः ।

६७ बन्धेर्नाम्नि ।

६८ आधारात् ।

६९ कर्तुर्जीवपुरुषान्नश्वहः ।

७० ऊर्ध्वात्पूः शुषः ।

७१ व्याप्याच्चेवात् ।

७२ उपात्किरो लवने ।

७३ दंशेस्तृतीयया ।

७४ हिंसार्थादेकाप्यात् ।

७५ उपपीडरुधकर्षस्तत्सप्तम्या ।

७६ प्रमाणसमासत्त्योः ।

७७ पञ्चम्या त्वरायाम् ।

७८ द्वितीयया ।

७९ स्वाङ्गेनाऽध्रुवेण ।

८० परिक्लेश्येन ।

८१ विशपतपदस्कन्दो वीप्साभीक्ष्ण्ये ।

८२ कालेन तृष्यस्वः क्रियान्तरे ।

८३ नाम्ना ग्रहादिशः ।

८४ कृगोऽव्ययेनाऽनिष्टोक्तौ क्त्वाणमौ ।

८५ तिर्यचाऽपवर्गे ।

८६ स्वाङ्गतश्च्व्यर्थेनानाविनाधार्थेन भुवश्च ।

८७ तूष्णीमा ।

८८ आनुलोम्येऽन्वचा ।

८९ इच्छार्थे कर्मणः सप्तमी ।

९० शकधृषज्ञारभलभसहार्हग्लाघटास्तिसमर्थार्थे च तुम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# षष्ठोऽध्यायः

प्रथमः पादः ।

१ तद्धितोऽणादिः ।
२ पौत्रादि वृद्धम् ।
३ वंश्यज्यायोभ्रात्रोर्जीवति प्रपौत्राद्यऽस्त्री युवा ।
४ सपिण्डे वयःस्थानाधिके जीवद्वा ।
५ युववृद्धं कुत्सार्चे वा ।
६ संज्ञादुर्वा ।
७ त्यदादिः ।
८ वृद्धिर्यस्य स्वरेष्वादिः ।
९ एदोद्देश एवेयादौ ।
१० प्राग्देशे ।
११ वाऽऽद्यात् ।
१२ गोत्रोत्तरपदाद्गोत्रादिवाऽजिह्वाकात्यहरितकात्यात् ।
१३ प्राग्जितादण् ।
१४ धनादेः पत्युः ।
१५ अनिदम्यणपवादे च दित्यदित्यादित्ययमपत्युत्तरपदाञ्ञ्यः ।
१६ बहिषष्टीकण्च ।
१७ कल्यग्नेरेयण् ।
१८ पृथिव्या ञाञ् ।
१९ उत्सादेरञ् ।
२० बष्कयादसमासे ।
२१ देवाद्यञ् च ।
२२ अः स्थाम्नः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२३ लोम्नोऽपत्येषु ।

२४ द्विगोरनपत्ये यस्वरादेर्लुबद्विः ।

२५ प्राग्वतः स्त्रीपुंसान्नञ् स्नञ् ।

२६ त्वे वा ।

२७ गोः स्वरे यः ।

२८ ङसोऽपत्ये ।

२९ आद्यात् ।

३० वृद्धाद्यूनि ।

३१ अत इञ् ।

३२ बाह्वादिभ्यो गोत्रे ।

३३ वर्मणोऽचक्रात् ।

३४ अजादिभ्यो धेनोः ।

३५ ब्राह्मणाद्वा ।

३६ भूयः सम्भूयोऽम्भोऽमितौजसः स्लुक्च ।

३७ शालङ्क्यौदिषाडिवाड्वलि ।

३८ व्यासवरुटसुधातृनिषादबिम्बचण्डालादन्तस्य चाक् ।

३९ पुनर्भूपुत्रदुहितृननान्दुरनन्तरेऽञ् ।

४० परस्त्रियाः परशुश्चाऽसावर्ण्ये ।

४१ विदादेर्वृद्धे ।

४२ गर्गादेर्यञ् ।

४३ मधुबभ्रोर्ब्राह्मणकौशिके ।

४४ कपिबोधादाङ्गिरसे ।

४५ वतण्डात् ।

४६ स्त्रियां लुप् ।

४७ कुञ्जादेर्ञायन्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४८ स्त्रिबहुष्वायनञ्।

४९ अश्वादेः।

५० शपभरद्वाजादात्रेये।

५१ भर्गात्त्रैगर्त्ते।

५२ आत्रेयाद्भारद्वाजे।

५३ नडादिभ्य आयनण्।

५४ यञिञः।

५५ हरितादेरञः।

५६ क्रोष्टृशलङ्कोर्लुक्च।

५७ दर्भकृष्णाग्निशर्मरणशरद्वच्छुनकादाग्रायणब्राह्मणवार्षगण्यवाशिष्ठभार्गववात्स्ये।

५८ जीवन्तपर्वताद्वा।

५९ द्रोणाद्वा।

६० शिवादेरण्।

६१ ऋषिवृष्ण्यन्धककुरुभ्यः।

६२ कन्यात्रिवेण्याः कनीनत्रिवणं च।

६३ शुङ्गाभ्यां भारद्वाजे।

६४ विकर्णच्छगलाद्वात्स्यात्रेये।

६५ णश्च विश्रवसो विश्लुक्च वा।

६६ संख्यासंभद्रान्मातुर्मातुर्च।

६७ अदोर्नदीमानुषीनाम्नः।

६८ पीलासाल्वामण्डूकाद्वा।

६९ दितिश्चैयण् वा।

७० ङ्याप्त्यूङः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७१ द्विस्वरादनद्याः ।
७२ इतोऽनिञः ।
७३ शुभ्रादिभ्यः ।
७४ श्यामलक्षणाद्वा-
शिष्ठे ।
७५ विकर्णकुषीतका-
त्काश्यपे ।
७६ भ्रुवो भ्रुव् च ।
७७ कल्याण्यादेरिन्
चान्तस्य ।
७८ कुलटाया वा ।
७९ चटकाण्णैरः स्त्रियां
तु लुप् ।
८० क्षुद्राभ्य एरण् वा ।
८१ गोधाया दुष्टे
णारश्च ।
८२ जण्टपण्टात् ।
८३ चतुष्पाद्भ्य एयञ् ।
८४ गृष्ट्यादेः ।
८५ वाडवेयो वृषे ।
८६ रेवत्यादेरिकण् ।
८७ वृद्धस्त्रियाः क्षेपे
णश्च ।
८८ भ्रातुर्व्यः ।
८९ ईयः स्वसुश्च ।
९० मातृपित्रादेर्डेय-
णीयणौ ।
९१ श्वशुराद्यः ।
९२ जातौ राज्ञः
९३ क्षत्रादियः ।
९४ मनोर्याणौ
षश्चान्तः ।
९५ माणवः कुत्सा-
याम् ।
९६ कुलादीनः ।
९७ यैयकञावसमासे
वा ।
९८ दुष्कुलादेयण्वा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



९९ महाकुलाद्वाऽ-
ञीनञौ।

१०० कुर्वादेर्न्यः।

१०१ सम्राजः क्षत्रिये।

१०२ सेनान्त कारु
लक्ष्मणादिञ्श्च।

१०३ सुयाम्नः सौवीरे-
ष्वायनिञ्।

१०४ पाण्टाहृतिमिम-
ताण्णश्च।

१०५ भागावित्तितार्ण-
विन्दवाऽकशापे-
यान्निन्दायामि-
कण्वा।

१०६ सौयामायनि
यामुन्दायनि
वार्ष्यायणेरीयश्च
वा।

१०७ तिकादेरायनिञ्।

१०८ दगुकोशलकर्मार
च्छागवृषाद्यादिः।

१०९ द्विस्वरादणः ।

११० अवृद्धाद्दोर्नवा।

१११ पुत्रान्तात्।

११२ चर्मिवर्मिगारेट
कार्कटयकाक
लङ्कावाकिनाच्च
कश्चान्तोऽन्त्यस्व-
रात्।

११३ अदोरायनिः प्रायः।

११४ राष्ट्रक्षत्रियात्स-
रूपाद्राजापत्ये
द्रिरञ्।

११५ गान्धारिसाल्वे-
याभ्याम्।

११६ पुरुमगधकलिङ्ग
सूरमसद्विस्वरा-
दण्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



११७ साल्वांशप्रत्यग्रथकलकूटाऽश्मकादिञ् ।

११८ दुनादिकुर्वित्कोशलाजादाञ्ञ्यः ।

११९ पाण्डोर्ड्यण् ।

१२० शकादिभ्यो द्रेर्लुप् ।

१२१ कुन्त्यवन्तेः स्त्रियाम् ।

१२२ कुरोर्वा ।

१२३ द्रेरञणोऽप्राच्यभर्गादेः ।

१२४ बहुष्वऽस्त्रियाम् ।

१२५ यस्कादेर्गोत्रे ।

१२६ यञञोऽश्यापर्णान्तगोपवनादेः ।

१२७ कौण्डिन्यागस्त्ययोः कुण्डिनागस्ती च ।

१२८ भृग्वङ्गिरस्कुत्सवशिष्ठगोतमाऽत्रेः ।

१२९ प्राग्भरते बहुस्वरादिञः ।

१३० वोपकादेः ।

१३१ तिककितवादौ द्वन्द्वे ।

१३२ द्र्यादेस्तथा ।

१३३ वाऽन्येन ।

१३४ द्व्येकेषु षष्ठ्यास्तत्पुरुषे यञादेर्वा ।

१३५ न प्राग्जितीये स्वरे ।

१३६ गर्गभार्गविका ।

१३७ यूनि लुप् ।

१३८ वायनणायनिञोः ।

१३९ द्रीञो वा ।

१४० ञिदार्षादणिञोः ।

१४१ अब्राह्मणात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१४२ पैलादेः ।
१४३ प्राच्येऽञोऽतौल्वल्यादेः ।

---

द्वितीयः पादः ।

१ रागाट्टो रक्ते ।
२ लाक्षारोचनादिकण् ।
३ शकलकर्दमाद्वा ।
४ नीलपीतादकम् ।
५ उदितगुरोर्भाद्युक्तेऽब्दे ।
६ चन्द्रयुक्तात्काले लुप्त्वऽप्रयुक्ते ।
७ द्वन्द्वादीयः ।
८ श्रवणाऽश्वत्थान्नाम्न्यः ।
९ षष्ठ्याः समूहे ।
१० भिक्षादेः ।
११ क्षुद्रकमालवात्सेनानाम्नि ।
१२ गोत्रोक्षवत्सोष्ट्रवृद्धाऽजोरभ्रमनुष्यराजराजन्यराजपुत्रादकञ् ।
१३ केदाराण्यश्च ।
१४ कवचिहस्त्यऽचित्ताच्चेकण् ।
१५ धेनोरनञः ।
१६ ब्राह्मणमाणववाडवाद्यः ।
१७ गणिकाया ण्यः ।
१८ केशाद्वा ।
१९ वाऽश्वादीयः ।
२० पर्श्वा ड्वण् ।
२१ ईनोऽन्हः क्रतौ ।
२२ पृष्ठाद्यः ।
२३ चरणाद्धर्म्मवत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२४ गोरथवातात्त्र-
ल्कट्यल्लूलम् ।
२५ पाशादेश्च ल्यः ।
२६ श्वादिभ्योऽञ् ।
२७ खलादिभ्यो लिन् ।
२८ ग्रामजनबन्धुग-
जसहायात्तल् ।
२९ पुरुषात्कृतहितव-
धविकारे चैयञ् ।
३० विकारे ।
३१ प्राण्यौषधिवृक्षे-
भ्योऽवयवे च ।
३२ तालाद्धनुषि ।
३३ त्रपुजतोः षोन्तश्च ।
३४ शम्या लः ।
३५ पयोद्रोर्यः ।
३६ उष्ट्रादकञ् ।
३७ उमोर्णाद्वा ।
३८ एण्या एयञ् ।
३९ कौशेयम् ।
४० परशव्याद्यलुक्
च ।
४१ कंसीयाञ्ञ्यः ।
४२ हेमार्थान्माने ।
४३ द्रोर्वयः ।
४४ मानात्क्रीतवत् ।
४५ हेमादिभ्योऽञ् ।
४६ अभक्ष्याच्छादने
वा मयट् ।
४७ शरदर्भकूदीतृण-
सोमवल्वजात् ।
४८ एकस्वरात् ।
४९ दोरप्राणिनः ।
५० गोः पुरीषे ।
५१ व्रीहेः पुरोडाशे ।
५२ तिलयवादनाम्नि ।
५३ पिष्टात् ।
५४ नाम्नि कः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५५ ह्योगोदोहादीनञ् हियङ्गुश्चास्य ।
५६ अपोयञ्वा ।
५७ लुब्बहुलं पुष्पमूले।
५८ फले ।
५९ प्लक्षादेरण् ।
६० जम्ब्वा वा ।
६१ नद्विरद्रुवयगोमयफलात् ।
६२ पितृमातुर्व्यडुलं भ्रातरि ।
६३ पित्रोर्डामहट् ।
६४ अवेर्दुग्धे सोढदूसमरीसम् ।
६५ राष्ट्रेऽनङ्गादिभ्यः ।
६६ राजन्यादिभ्योऽकञ् ।
६७ वसातेर्वा ।
६८ भौरिक्यैषुकार्यादेर्विधभक्तम् ।
६९ निवासाऽदूरभवे इति देशे नाम्नि।
७० तदत्रा ऽस्ति ।
७१ तेन निर्वृत्ते च ।
७२ नद्यां मतुः ।
७३ मध्वादेः ।
७४ नडकुमुदवेतसमहिषाड्डित् ।
७५ नडशादाद्वलः ।
७६ शिखायाः ।
७७ शिरीषादिककणौ।
७८ शर्कराया इकणीयाऽण् च ।
७९ रोऽश्मादेः ।
८० प्रेक्षादेरिन् ।
८१ तृणादेः सल् ।
८२ काशादेरिलः ।
८३ अरीहणादेरकण् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



८४ सुपन्थ्यादेर्ञ्यः ।
८५ सुतङ्गमादेरिञ् ।
८६ बलादेर्यः ।
८७ अहरादिभ्योऽञ् ।
८८ सख्यादेरेयण् ।
८९ पन्थ्यादेरायनण् ।
९० कर्णादेरायनिञ् ।
९१ उत्करादेरीयः ।
९२ नडादेः कीयः ।
९३ कृशाश्वादेरीयण् ।
९४ ऋश्यादेः कः ।
९५ वराहादेः कण्
९६ कुमुदादेरिकः ।
९७ अश्वत्थादेरिकण् ।
९८ सास्य पौर्णमासी ।
९९ आग्रहायण्यश्वत्थादिकण् ।
१०० चैत्रीकार्त्तिकीफाल्गुनीश्रवणाद्वा ।
१०१ देवता ।
१०२ पैङ्गाक्षीपुत्रादेरीयः ।
१०३ शुक्रादियः ।
१०४ शतरुद्रात्तौ ।
१०५ अपोनपादपान्नपातस्तृचातः ।
१०६ महेन्द्राद्वा ।
१०७ कसोमाट्ट्यण् ।
१०८ द्यावापृथिवीशुनासीराऽग्नीषोममरुत्वद्वास्तोष्पतिगृहमेधादीययौ ।
१०९ वाय्वृतुपित्रुषसो यः ।
११० महाराजप्रोष्ठपदादिकण् ।
१११ कालाद्भववत् ।

For Private and Personal Use Only

११२ आदेश्छन्दसः प्रगाथे ।
११३ योदृधृप्रयोजनाद्युद्धे ।
११४ भावघञोऽस्यां णः
११५ श्यैनम्पातातैलम्पाता ।
११६ प्रहरणात् क्रीडायां णः ।
११७ तद्वेत्त्यधीते ।
११८ न्यायादेरिकण् ।
११९ पदकल्पलक्षणान्तक्रत्वाख्यानाख्यायिकात् ।
१२० अकल्पात्सूत्रात् ।
१२१ अधर्मक्षत्रत्रिसंसर्गाङ्गाद्विद्यायाः
१२२ याज्ञिकौक्थिकलौकायितिकम् ।
१२३ अनुब्राह्मणादिन् ।
१२४ शतषष्टेः पथ इकट् ।
१२५ पदोत्तरपदेभ्य इकः
१२६ पदक्रमशिक्षामीमांसासाम्नोऽकः।
१२७ ससर्वपूर्वाल्लुप् ।
१२८ संख्याकात्सूत्रे ।
१२९ प्रोक्तात् ।
१३० वेदेनब्राह्मणमत्रैव ।
१३१ तेनच्छन्ने रथे ।
१३२ पाण्डुकम्बलादिन् ।
१३३ दृष्टे साम्नि नाम्नि ।
१३४ गोत्रादङ्कवत् ।
१३५ वामदेवाद्यः ।
१३६ डिद्वाऽण् ।
१३७ वा जाते द्विः ।
१३८ तत्रोद्धृते पात्रेभ्यः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१३९ स्थण्डिलाच्छेते व्रती ।
१४० संस्कृते भक्ष्ये ।
१४१ शूलोखाद्यः ।
१४२ क्षीरादेयण् ।
१४३ दध्न इकण् ।
१४४ वोदश्वितः ।
१४५ क्वचित् ।

तृतीयः पादः ।

१ शेषे ।
२ नद्यादेरेयण् ।
३ राष्ट्रादियः ।
४ दूरादेत्यः ।
५ उत्तरादाहञ् ।
६ पारावारादीनः ।
७ व्यस्तव्यत्यस्तात् ।
८ द्युप्रागपागुदक्प्रतीचो यः ।
९ ग्रामादीनञ्च ।
१० कत्र्यादेश्चैयकञ् ।
११ कुण्ड्यादिभ्यो यलुक्च ।
१२ कुलकुक्षिग्रीवाच्छ्वास्यलङ्कारे ।
१३ दक्षिणापश्चात्पुरस्त्यण् ।
१४ वल्ह्युर्दिपर्दिकापिश्याष्टायनण् ।
१५ रंकोः प्राणिनि वा ।
१६ क्वेहामात्रतसस्त्यच् ।
१७ नेर्ध्रुवे ।
१८ निसो गते ।
१९ ऐषमोह्यःश्वसो वा ।
२० कन्थाया इकण् ।
२१ वर्णावकञ् ।
२२ रूप्योत्तरपदारण्याण्णः ।

For Private and Personal Use Only

२३ दिक्पूर्वादनाम्नः।
२४ मद्रादञ्।
२५ उदग्ग्रामाद्यकृ-
ल्लोम्नः।
२६ गोष्ठीतैकीनैकेती-
गोमतीशूरसेनवा-
हीकरोमकपटच्च-
रात्।
२७ शकलादेर्यञः।
२८ वृद्धेऽञः।
२९ न द्विस्वरात्प्राग्भ-
रतात्।
३० भवतोरिकणी-
यसौ।
३१ परजनराज्ञोऽकीयः
३२ दोरीयः।
३३ उष्णादिभ्यः
कालात्।
३४ व्यादिभ्यो णिके-
कणौ।
३५ काश्यादेः।
३६ वाहीकेषु ग्रामात्।
३७ वोशीनरेषु।
३८ वृजिमद्राद्देशात्कः।
३९ उवर्णादिकण्।
४० दोरेव प्राचः।
४१ इतोऽकञ्।
४२ रोपान्त्यात्।
४३ प्रस्थपुरवहान्तयो-
पान्त्यधन्वार्थात्।
४४ राष्ट्रेभ्यः।
४५ बहुविषयेभ्यः।
४६ धूमादेः।
४७ सौवीरेषु कूलात्।
४८ समुद्रान्नृनावोः।
४९ नगरात्कुत्सादा-
क्ष्ये।
५० कच्छाग्निवक्त्रव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्त्तोत्तरपदात् ।
५१ अरण्यात्पथिन्यायाध्यायेभनरविहारे ।
५२ गोमये वा ।
५३ कुरुयुगन्धराद्वा ।
५४ साल्वाद्गोयवाग्वपत्तौ ।
५५ कच्छादेर्नृनृस्थे ।
५६ कोपान्त्याच्चाण् ।
५७ गर्त्तोत्तरपदादीयः ।
५८ कटपूर्वात्प्राचः ।
५९ कखोपान्त्यकन्थापलदनगरग्रामह्रदोत्तरपदाद्दोः ।
६० पर्वतात् ।
६१ अनरे वा ।
६२ पर्णकृकणाद्भारद्वाजात् ।
६३ गहादिभ्यः ।
६४ पृथिवीमध्यान्मध्यमश्चास्य ।
६५ निवासाच्चरणेऽण् ।
६६ वेणुकादिभ्य ईयण्
६७ वा युष्मदस्मदोऽञीनञौ युष्माकास्माकं चास्यैकत्वे तु तवकममकम् ।
६८ द्वीपादनुसमुद्रं ण्यः ।
६९ अर्द्धाद्यः ।
७० सपूर्वादिकण् ।
७१ दिक्पूर्वात्तौ ।
७२ ग्रामराष्ट्रांशादणिकणौ ।
७३ परावराधमोत्तमादेर्यः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७४ अमोन्तावोऽधसः।

७५ पश्चादाद्यन्ताग्रादिमः।

७६ मध्यान्मः।

७७ मध्येउत्कर्षापकर्षयोरः।

७८ अध्यात्मादिभ्य इकण्।

७९ समानपूर्वलोकोत्तरपदात्।

८० वर्षाकालेभ्यः।

८१ शरदः श्राद्धे कर्म्मणि।

८२ नवा रोगातपे।

८३ निशाप्रदोषात्।

८४ श्वसस्तादिः।

८५ चिरपरुत्परारेस्त्नः

८६ पुरो नः।

८७ पूर्वाह्णापराह्णात्तनट्।

८८ सायश्चिरंप्राह्णेप्रगेऽव्ययात्।

८९ भर्तुसन्ध्यादेरण्।

९० संवत्सरात्फलपर्वणोः।

९१ हेमन्ताद्वा तलुक्च।

९२ प्रावृष एण्यः।

९३ स्थामाजिनान्ताल्लुप्।

९४ तत्र कृतलब्धक्रीतसम्भूते।

९५ कुशले।

९६ पथोऽकः।

९७ कोऽश्मादेः।

९८ जाते।

९९ प्रावृष इकः।

१०० नाम्नि शरदोऽकञ्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१०१ सिन्धवपकरा-त्काणौ ।

१०२ पूर्वाह्णापराह्णाद्रामूलप्रदोषावस्करादकः ।

१०३ पथः पन्थ च ।

१०४ अश्व वामावास्यायाः ।

१०५ श्रविष्ठाषाढादीयण् च ।

१०६ फल्गुन्याष्टः ।

१०७ बहुलाऽनुराधापुष्यार्थपुनर्वसुहस्तविशाखास्वातेर्लुप् ।

१०८ चित्रारेवतीरोहिण्याः स्त्रियाम् ।

१०९ बहुलमन्येभ्यः ।

११० स्थानान्तगोशालखरशालात् ।

१११ वत्सशालाद्वा ।

११२ सोदर्यसमानोदर्यौ ।

११३ कालाद्देये ऋणे ।

११४ कलाप्यश्वत्थयवबुसोमाव्यासैषमसोऽकः ।

११५ ग्रीष्मावरसमादकञ् ।

११६ संवत्सराग्रहायण्या इकण् च ।

११७ साधुपुष्पत्पच्यमाने ।

११८ उप्ते ।

११९ आश्वयुज्या अकञ् ।

१२० ग्रीष्मवसन्ताद्वा ।

१२१ व्याहरति मृगे ।

१२२ जयिनि च ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१२३ भवे।
१२४ दिगादिदेहांशाद्यः।
१२५ नाम्न्युदकात्।
१२६ मध्यादिनण्णेया-
मोऽन्तश्च।
१२७ जिह्वामूलाङ्गुले-
श्चेयः।
१२८ वर्गान्तात्।
१२९ ईनयौ चाऽशब्दे।
१३० दृतिकुक्षिकलशि-
बस्त्यहेरेयण्।
१३१ आस्तेयम्।
१३२ ग्रीवातोऽण् च।
१३३ चतुर्मासान्नाम्नि।
१३४ यज्ञे ञ्यः।
१३५ गम्भीरपञ्चजन-
बहिर्देवात्।
१३६ परिमुखादेरव्ययी-
भावात्।

१३७ अन्तः पूर्वादिकण्।
१३८ पर्यनोर्ग्रामात्।
१३९ उपाज्जानुनीविक-
र्णात्प्रायेण।
१४० रूढावन्तःपुरा-
दिकः।
१४१ कर्णललाटात्कल्।
१४२ तस्य व्याख्याने
च ग्रन्थात्।
१४३ प्रायोबहुस्वरादि-
कण्।
१४४ ऋगृद्वृद्धिस्वरयागे-
भ्यः।
१४५ ऋषेरध्याये।
१४६ पुरोडाशपौरोडा-
शादिकेकटौ।
१४७ छन्दसो यः।
१४८ शिक्षादेश्चाण्।
१४९ तत आगते।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१५० विद्यायोनिसम्बन्धादकञ्।
१५१ पितुर्यो वा।
१५२ ऋत इकण्।
१५३ आयस्थानात्।
१५४ शुण्डिकादेरण्।
१५५ गोत्रादङ्कवत्।
१५६ नृहेतुभ्यो रूप्यमयटौ वा।
१५७ प्रभवति।
१५८ वैडूर्यः।
१५९ त्यदादेर्मयट्।
१६० तस्येदम्।
१६१ हलसीरादिकण्।
१६२ समिध आधाने टेन्यण्।
१६३ विवाहे द्वन्द्वादकल्।
१६४ अदेवासुरादिभ्यो वैरे।
१६५ नटान्नृत्ते ञ्यः।
१६६ छन्दोगौक्थिकयाज्ञिकबह्वृचाच्च धर्माम्नायसङ्घे।
१६७ आथर्वणिकादणिकलुक्च।
१६८ चरणादकञ्।
१६९ गोत्राददण्डमाणवशिष्ये।
१७० रैवतिकादेरीयः।
१७१ कौपिञ्जलहास्तिपदादण्।
१७२ सङ्घघोषाङ्कलक्षणेऽञ्यञिञः।
१७३ शाकलादकञ्च।
१७४ गृहेऽग्नीधोरण् धश्च।
१७५ रथात्सादेश्च

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वोढ्रऽङ्के।
१७६ यः।
१७७ पत्रपूर्वादञ्।
१७८ वाहनात्।
१७९ वाह्यपथ्युपकरणे।
१८० वहेस्तुरिश्चादिः।
१८१ तेन प्रोक्ते।
१८२ मौदादिभ्यः।
१८३ कठादिभ्यो वेदे लुप्।
१८४ तित्तिरिवरतन्तुखण्डिकोखादीयण्।
१८५ छगलिनो णेयिन्।
१८६ शौनकादिभ्यो णिन्।
१८७ पुराणे कल्पे।
१८८ काश्यपकौशिकाद्वेदवच्च।
१८९ शिलालिपाराशर्यान्नटभिक्षुसूत्र।
१९० कृशाश्वकर्मन्दादिन्।
१९१ उपज्ञाते।
१९२ कृते।
१९३ नाम्नि मक्षिकादिभ्यः।
१९४ कुलालादेरकञ्।
१९५ सर्वचर्म्मण ईनेनञौ।
१९६ उरसोयाणौ।
१९७ छन्दस्यः।
१९८ अमोऽधिकृत्यग्रन्थे।
१९९ ज्योतिषम्।
२०० शिशुक्रन्दादिभ्य ईयः।
२०१ द्वन्द्वात्प्रायः।
२०२ अभिनिष्काम-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिद्वारे।
२०३ गच्छति पथिदूते।
२०४ भजति।
२०५ महाराजादिकण्।
२०६ अचित्താददेश-
कालात्।
२०७ वासुदेवार्ज्जुना-
दकः।
२०८ गोत्रक्षत्रियेभ्यो-
ऽकञ् प्रायः।
२०९ सरूपाद् द्रेः सर्वं
राष्ट्रवत्।
२१० टस्तुल्यदिशि।
२११ तसिः।
२१२ यश्चोरसः।
२१३ सेर्निवासादस्य।
२१४ आभिजनात्।
२१५ शण्डिकादेर्ण्यः।
२१६ सिन्ध्वादेरञ्।
२१७ सलातुरादीयण्।
२१८ तूदीवर्मत्या एयण्।
२१९ गिरेरीयोऽस्त्राजीवे।

---

चतुर्थः पादः।

१ इकण्।
२ तेन जितजयद्दी-
व्यत्खनत्सु।
३ संस्कृते।
४ कुलत्थकोपान्त्या-
दण्।
५ संसृष्टे।
६ लवणादः।
७ चूर्णमुद्गाभ्यामि-
नणौ।
८ व्यञ्जनेभ्य
उपसिक्ते।
९ तरति।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१० नौद्विस्वरादिकः ।
११ चरति ।
१२ पर्पादेरिकट ।
१३ पदिकः ।
१४ श्वगणाद्वा ।
१५ वेतनादेर्जीवति ।
१६ व्यस्ताच्च क्रयविक्रयादिकः ।
१७ वस्नात् ।
१८ आयुधादीयश्च ।
१९ व्रातादीनञ् ।
२० निर्वृत्तेऽक्षद्यूतादेः ।
२१ भावादिमः ।
२२ याचितापमित्यात्कण् ।
२३ हरत्युत्सङ्गादेः ।
२४ भस्त्रादेरिकट् ।
२५ विवधवीवधाद्वा ।
२६ कुटिलिकाया अण् ।
२७ ओजःसहोम्भसो वर्त्तते ।
२८ तं प्रत्यनोर्लोमेपकूलात् ।
२९ परेर्मुखपार्श्वात् ।
३० रक्षदुञ्छतोः ।
३१ पक्षिमत्स्यमृगार्थाद् घ्नति ।
३२ परिपन्थात्तिष्ठति च ।
३३ परिपथात् ।
३४ अवृद्धेर्गृह्णति गर्ह्ये ।
३५ कुसीदादिकट् ।
३६ दशैकादशादिकश्च ।
३७ अर्थपदपदोत्तरललामप्रतिकण्ठात् ।
३८ परदारादिभ्यो गच्छति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३९ प्रतिपथादिकश्च ।
४० माथोत्तरपदपद-
व्याक्रन्दाद्धावति ।
४१ पश्चात्यनुपदात् ।
४२ सुस्नातादिभ्यः
पृच्छति ।
४३ प्रभूतादिभ्यो
ब्रुवति ।
४४ माशब्द इत्यादि
भ्यः ।
४५ शाब्दिकदार्दरिक-
लालाटिककौक्कु-
टिकम् ।
४६ समूहार्थात्समवेते।
४७ पर्षदो ण्यः ।
४८ सेनाया वा ।
४९ धर्माधर्माच्चरति ।
५० षष्ठ्या धर्म्ये ।
५१ ऋन्नरादेरण् ।
५२ विभाजयितृविश-
सितुर्णीड्लुक् च ।
५३ अवक्रये ।
५४ तदस्य पण्यम् ।
५५ किशरादेरिकट् ।
५६ शलालुनो वा ।
५७ शिल्पम् ।
५८ मड्डुकझर्झराद्वा-
ऽण ।
५९ शीलम् ।
६० अङ्गस्थाच्छत्रा-
देरञ् ।
६१ तूष्णीकः ।
६२ प्रहरणम् ।
६३ परश्वधाद्वाऽण् ।
६४ शक्तियष्टेष्टीकण् ।
६५ वेष्ट्यादिभ्यः ।
६६ नास्तिकास्तिक-
दैष्टिकम् ।

For Private and Personal Use Only

६७ वृत्तोऽपपाठो-
ऽनुयोगे ।
६८ बहुस्वरपूर्वादिकः ।
६९ भक्ष्यं हितमस्मै ।
७० नियुक्तं दीयते ।
७१ श्राणामांसौदना-
दिको वा ।
७२ भक्तौदनाद्वा
णिकट् ।
७३ नवयज्ञादयोऽस्मि-
न् वर्त्तन्ते ।
७४ तत्र नियुक्ते ।
७५ अगारान्तादिकः ।
७६ अदेशकालाद-
ध्यायिनि ।
७७ निकटादिषु
वसति ।
७८ सतीर्थ्यः ।
७९ प्रस्तारसंस्थानतद-
न्तकठिनातेभ्यो
व्यवहरति ।
८० सङ्ख्यादेश्चार्हद-
लुचः ।
८१ गोदानादीनां
ब्रह्मचर्ये ।
८२ चन्द्रायणं च
चरति ।
८३ देवव्रतादीन् डिन् ।
८४ डकश्चाष्टाचत्वारिं-
शतं वर्षाणाम् ।
८५ चातुर्मास्यन्तौ
यलुक् च ।
८६ क्रोशयोजनपूर्वा-
च्छताद्योजनाच्चा-
ऽभिगमार्हे ।
८७ तद्यात्येभ्यः ।
८८ पथ इकट् ।
८९ नित्यं णः पन्थश्च ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



९० शङ्कूत्तरकान्ता-
राजवारिस्थलज-
ङ्गलादेस्तेनाहृते च।
९१ स्थलादेर्मधुकमरि-
चेऽण् ।
९२ तुरायणपारायणं
यजमानाऽधीयाने।
९३ संशयं प्राप्ते
ज्ञेये ।
९४ तस्मै योगादेः
शक्ते ।
९५ योगकर्मभ्यां
योकञौ।
९६ यज्ञानां दक्षिणा-
याम् ।
९७ तेषु देये ।
९८ काले कार्ये च
भववत् ।
९९ व्युष्टादिष्वण् ।
१०० यथाकथाचाण्णः।
१०१ तेन हस्ताद्यः ।
१०२ शोभमाने ।
१०३ कर्मवेषाद्यः ।
१०४ कालात्परिजय्यल-
भ्यकार्यसुकरे ।
१०५ निर्वृत्ते ।
१०६ तं भाविभूते ।
१०७ तस्मै भृताऽधी-
ष्टे च ।
१०८ षण्मासादवयसि
ण्येकौ ।
१०९ समाया ईनः ।
११० रात्र्यहःसंवत्सरा-
च्च द्विगोर्वा ।
१११ वर्षादश्च वा ।
११२ प्राणिनि भूते ।
११३ मासाद्वयसि यः ।
११४ ईनञ्च ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



११५ षण्मासाद्यण्यण्-
णिकण् ।
११६ सोऽस्य ब्रह्मचर्य-
तद्वतोः ।
११७ प्रयोजनम् ।
११८ एकागाराच्चौरे ।
११९ चूडादिभ्योऽण् ।
१२० विशाखाषाढा-
न्मन्थदण्डे ।
१२१ उत्थापनादेरीयः ।
१२२ विशिरुहिपदिपू-
रिसमापेरनात्स-
पूर्वपदात् ।
१२३ स्वर्गस्वस्तिवाच-
नादिभ्यो यलुपौ
१२४ समयात्प्राप्तः ।
१२५ ऋत्वादिभ्योऽण् ।
१२६ कालाद्यः ।
१२७ दीर्घः ।
१२८ आकालिकमिक-
श्चाद्यन्ते ।
१२९ त्रिंशद्विंशतेर्डको-
ऽसंज्ञायामार्हदर्थे ।
१३० सङ्ख्याडतेश्चाऽ-
शत्तिष्टेः कः ।
१३१ शतात्केवलादत-
स्मिन्येकौ ।
१३२ वातोरिकः ।
१३३ कार्षापणादिकट्
प्रति श्चास्य वा ।
१३४ अर्द्धात्पलकंसक-
र्षात् ।
१३५ कंसार्द्धात् ।
१३६ सहस्रशतमा-
नादण् ।
१३७ शूर्पाद्वाऽञ् ।
१३८ वसनात् ।
१३९ विंशतिकात् ।

For Private and Personal Use Only

१४० द्विगोरीनः।
१४१ अनाम्न्यऽद्विः प्लुप्।
१४२ नवाणः।
१४३ सुवर्णकार्षापणात्।
१४४ द्वित्रिबहोर्निष्कविस्तात्।
१४५ शताद्यः।
१४६ शाणात्।
१४७ द्वित्र्यादेर्याऽण् वा।
१४८ पणपादमाषाद्यः।
१४९ खारीकाकणीभ्यः कच्।
१५० मूल्यैः क्रीते।
१५१ तस्य वापे।
१५२ वातपित्तश्लेष्मसन्निपाताच्छमनकोपने।
१५३ हेतौ संयोगोत्पाते।
१५४ पुत्राद्येयौ।
१५५ द्विस्वरब्रह्मवर्चसाद्योऽसङ्ख्यापरिमाणाश्वादेः।
१५६ पृथिवीसर्वभूमेरीशज्ञातयोश्चाञ्।
१५७ लोकसर्वलोकात् ज्ञाते।
१५८ तदत्रास्मै वा वृद्ध्यायलाभोपदाशुल्कं देयम्।
१५९ पूरणाद्धार्दिकः।
१६० भागाद्येकौ।
१६१ तं पचतिद्रोणाद्वाऽञ्।
१६२ सम्भवदवहरतोश्च।
१६३ पात्राचिताढकादीनो वा।

१६४ द्विगोरीनेकटौ वा।
१६५ कुलिजाद्वा लुप् च।
१६६ वंशादेर्भाराद्धरद्वहदावहत्सु।
१६७ द्रव्यवस्नात्केकम्।
१६८ सोऽस्य भृतिवस्नांशम्।
१६९ मानम्।
१७० जीवितस्य सन्।
१७१ सङ्ख्यायाः संघसूत्रपाठे।
१७२ नाम्नि।
१७३ विंशत्यादयः।
१७४ त्रैंशचात्वारिंशम्।
१७५ पञ्चद्दशद्वर्गे वा।
१७६ स्तोमे डट्।
१७७ तमर्हति।
१७८ दण्डादेर्यः।
१७९ यज्ञादियः।
१८० पात्रात्तौ।
१८१ दक्षिणाकडङ्गरस्थालीबिलादीययौ।
१८२ छेदादेर्नित्यम्।
१८३ विरागाद्विरङ्गश्च।
१८४ शीर्षच्छेदाद्यो वा।
१८५ शालीनकौपीनार्त्विजीनम्।

## सप्तमोऽध्यायः

प्रथमः पादः।

१ यः।
२ वहति रथयुगप्रासङ्गात्।
३ धुरो यैयण्।
४ वामाद्यादेरीनः।
५ अश्वैकादेः।
६ हलसीरादिकण्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७ शकटादण्।
८ विध्यत्यऽनन्येन।
९ धनगणाल्लब्धरि।
१० णोऽन्नात्।
११ हृद्यपद्यतुल्यमूल्यवश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यम्।
१२ नौविषेण तार्यवध्ये।
१३ न्यायार्थादनपेते।
१४ मतमदस्य करणे।
१५ तत्र साधौ।
१६ पथ्यतिथिवसतिस्वपतेरेयण्।
१७ भक्ताण्णः।
१८ पर्षदो ण्यणौ।
१९ सर्वजनाण्ण्येनञौ।
२० प्रतिजनादेरीनञ्।
२१ कथादेरिकण्।
२२ देवतान्तात्तदर्थे।
२३ पाद्यार्घ्ये।
२४ ण्योऽतिथेः।
२५ सादेश्चातदः।
२६ हलस्य कर्षे।
२७ सीतया संगते।
२८ ईयः।
२९ हविरन्नभेदापूपादेर्यो वा।
३० उवर्णयुगादेर्यः।
३१ नाभेर्नभ् चाऽदेहांशात्।
३२ न् चोधसः।
३३ शुनो वश्चोदूत्।
३४ कम्बलान्नाम्नि।
३५ तस्मै हिते।
३६ न राजाचार्यब्राह्मणवृष्णः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३७ प्राण्यङ्गरथखल-
तिलयवषृषब्रह्म-
माषाद्यः ।
३८ अव्यजात् थ्यप् ।
३९ चरकमाणवादी-
नञ् ।
४० भोगोत्तरपदात्म-
भ्यामीनः ।
४१ पञ्चसर्वविश्वाज्ज-
नात्कर्मधारये ।
४२ महत्सर्वादिकण् ।
४३ सर्वाण्णो वा ।
४४ परिणामिनि
तदर्थे ।
४५ चर्मण्यञ् ।
४६ ऋषभोपान-
हाञ्ञ्यः ।
४७ छदिर्बलेरेयण् ।
४८ परिखाऽस्य स्यात् ।
४९ अत्र च ।
५० तद् ।
५१ तस्यार्हे क्रियायां
वत् ।
५२ स्यादेरिवे ।
५३ तत्र ।
५४ तस्य ।
५५ भावे त्वतल् ।
५६ प्राक्त्वादगडुलादेः ।
५७ नञ्तत्पुरुषादबु-
धादेः ।
५८ पृथ्वादेरिमन्वा ।
५९ वर्णदृढादिभ्य-
ष्ट्यण् च वा ।
६० पतिराजान्तगुणा-
ङ्गराजादिभ्यः
कर्म्मणि च ।
६१ अर्हतस्तोन्त् च ।
६२ सहायाद्वा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



६३ सखिवणिगृदूताद्यः ।
६४ स्तेनान्नलुक्च ।
६५ कपिज्ञातेरेयण् ।
६६ प्राणिजातिवयोऽर्थादञ् ।
६७ युवादेरण् ।
६८ हायनान्तात् ।
६९ रवृवर्णाल्लघ्वादेः ।
७० पुरुषहृदयादसमासे ।
७१ श्रोत्रियाद्यलुक्च ।
७२ योपान्त्याद् गुरूपोत्तमादसुप्रख्यादकञ् ।
७३ चोरादेः ।
७४ द्वन्द्वाल्लित् ।
७५ गोत्रचरणात् श्लाघात्याकारप्राप्त्यवगमे ।
७६ होत्राभ्य ईयः ।
७७ ब्रह्मणस्त्वः ।
७८ शाकटशाकिनौ क्षेत्रे ।
७९ धान्येभ्य ईनञ् ।
८० व्रीहिशालेरेयण् ।
८१ यवयवकषष्टिकाद्यः ।
८२ वाणुमाषात् ।
८३ वोमाभङ्गतिलात् ।
८४ अलाब्वाश्च कटोरजसि ।
८५ अह्नागम्येऽश्वादीनञ् ।
८६ कुलाज्जल्पे ।
८७ पील्वादेः कुणः पाके ।
८८ कर्णादेर्मूले जाहः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



८९ पक्षात्तिः।

९० हिमादेलुः सहे।

९१ बलवातादूलः।

९२ शीतोष्णतृषादालुरसहे।

९३ यथामुखसंमुखादीनस्तदृहश्यतेऽस्मिन्।

९४ सर्वादेः पथ्यंगकर्मपत्रपात्ररावंव्याप्नोति।

९५ आप्रपदम्।

९६ अनुपदं बद्धा।

९७ अयानयं नेयः।

९८ सर्वान्नमत्ति।

९९ पदोवरीणपरंपरीणपुत्रपौत्रीणम्।

१०० यथाकामानुकामात्यन्तं गामिनि।

१०१ पारावारं व्यस्तव्यत्यस्तं च।

१०२ अनुग्वलम्।

१०३ अध्वानं येनौ।

१०४ अभ्यमित्रमीयश्च।

१०५ समांसमीनाद्यश्वीनाद्यप्रातीनाऽऽगवीनसाप्तपदीनम्।

१०६ अषडक्षाशितंगवलंकर्मालंपुरुषादीनः।

१०७ अदिक्स्त्रियांवाञ्चः।

१०८ तस्य तुल्ये कः संज्ञाप्रतिकृत्योः।

१०९ न नृपूजार्थध्वजचित्रे।

११० अपण्ये जीवने।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१११ देवपथादिभ्यः।
११२ वस्तेरेयञ्।
११३ शिलाया एयच्च ।
११४ शाखादेर्यः ।
११५ द्रोर्भव्ये।
११६ कुशाग्रादीयः।
११७ काकतालीयादयः।
११८ शर्करादेरण्।
११९ अः सपत्न्याः।
१२० एकशालाया इकः।
१२१ गोण्यादेश्चेकण्।
१२२ कर्कलोहिताट्टी-
कण् च ।
१२३ वेर्विस्तृते शाल-
शङ्कटौ।
१२४ कटः।
१२५ संप्रोन्नेः संकीर्ण-
प्रकाशाधिकस-
मीपे।
१२६ अवात्कुटारश्चा-
वनते।
१२७ नासानतितद्वतो-
ष्टीटनाटभ्रटम्।
१२८ नेरिनपिटकाश्चिक्-
चिचिकश्चास्य।
१२९ विडविरीसौ नीर-
न्ध्रे च।
१३० क्लिन्नाल्लश्चक्षुषि
चिल्पिल्चुल्
चास्य।
१३१ उपत्यकाधित्यके।
१३२ अवेस्संघातवि-
स्तारे कटपटम्।
१३३ पशुभ्यः स्थाने
गोष्ठः।
१३४ द्वित्वे गोयुगः।
१३५ षट्त्वे षड्गवः।
१३६ तिलादिभ्यः स्नेहे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तैलः।
१३७ तत्र घटते कर्म्मणष्ठः।
१३८ तदस्य सञ्जातं तारकादिभ्य इतः।
१३९ गर्भादप्राणिनि।
१४० प्रमाणान्मात्रट्।
१४१ हस्तिपुरुषाद्वाण्।
१४२ वोर्ध्वं दघ्नट्द्वयसट्।
१४३ मानादसंशये लुप्।
१४४ द्विगोः संशये च।
१४५ मात्रट्।
१४६ शन्शद्विंशतेः।
१४७ डिन्।
१४८ इदं किमोऽतुरियक्रियू चास्य।
१४९ यत्तदेतदोर्डावादिः।
१५० यत्तत्किमः संख्याया डतिर्वा।
१५१ अवयवात्तयट्।
१५२ द्वित्रिभ्यामयट् वा।
१५३ द्यादेर्गुणान्मूल्यक्रेये मयट्।
१५४ अधिकं तत्सङ्ख्यमस्मिन् शतसहस्रे शतिशद्दशान्ताया डः।
१५५ सङ्ख्यापूरणे डट्।
१५६ विंशत्यादेर्वा तमट्।
१५७ शतादिमासार्द्धमाससंवत्सरात्।
१५८ षष्ट्यादेरसङ्ख्यादेः।
१५९ नो मट्।
१६० पित्तिथट् बहुगण-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूगसङ्घात्।
१६१ अतोरिथट्।
१६२ षट्कतिकतिपयात् थट्।
१६३ चतुरः।
१६४ येयौ चलुक् च।
१६५ द्वेस्तीयः।
१६६ त्रेस्तृ च।
१६७ पूर्वमनेन सादेश्चेन्।
१६८ इष्टादेः।
१६९ श्राद्धमद्यभुक्त-मिकेनौ।
१७० अनुपद्यन्वेष्टा।
१७१ दाण्डाजिनिकायः शूलिकपार्श्वकम्।
१७२ क्षेत्रेऽन्यस्मिन्ना-श्ये इयः।
१७३ छन्दोऽधीते श्रोत्र-श्च वा।
१७४ इन्द्रियम्।
१७५ तेन वित्ते चञ्चुचणौ।
१७६ पूरणाद्ग्रन्थस्य ग्राहके को लुक्-चाऽस्य।
१७७ ग्रहणाद्वा।
१७८ सस्याद् गुणात्प-रिजाते।
१७९ धनहिरण्ये कामे।
१८० स्वाङ्गेषु सक्ते।
१८१ उदरेत्विकणाद्यूने।
१८२ अंशं हारिणि।
१८३ तन्त्रादचिरोद्धृते।
१८४ ब्राह्मणान्नाम्नि।
१८५ उष्णात्।
१८६ शीताच्च कारिणि।
१८७ अधेरारूढे।
१८८ अनोः कमितरि।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१८९ अभेरीश्च वा।
१९० सोऽस्यमुख्यः ।
१९१ शृङ्खलकः करभे।
१९२ उदुत्सोरुन्मनसि।
१९३ कालहेतुफलाद्रोगे।
१९४ प्रायोऽन्नमस्मिन्नाम्नि।
१९५ कुल्माषादण्।
१९६ वटकादिन्।
१९७ साक्षाद् द्रष्टा।

---

द्वितीयः पादः ।

१ तदस्याऽस्त्यस्मिन्निति मतुः।
२ आयात्।
३ नावादेरिकः।
४ शिखादिभ्य इन्।
५ व्रीह्यादिभ्यस्तौ।
६ अतोऽनेकस्वरात्।
७ अशिरसोऽशीर्षश्च।
८ अर्थार्थान्ताद्भावात्।
९ व्रीह्यर्थतुन्दादेरिलश्च।
१० स्वाङ्गाद्विवृद्धात्ते।
११ वृन्दादारकः।
१२ शृङ्गात्।
१३ फलबर्हाच्चेनः।
१४ मलादीमसश्च।
१५ मरुत्पर्वणस्तः।
१६ वलिवटितुण्डेर्भः।
१७ ऊर्णाऽहंशुभमो युस्।
१८ कंशंभ्यां युस्तियस्तुतवभम्।
१९ बलवातदन्तललाटादूलः।
२० प्राण्यङ्गादातोलः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२१ सिध्मादिक्षुद्रजन्तुरुग्भ्यः ।
२२ प्रज्ञापर्णोदकफेनाल्लेलौ ।
२३ कालाजटाघाटात् क्षेपे ।
२४ वाच आलाटौ ।
२५ ग्मिन् ।
२६ मध्वादिभ्यो रः ।
२७ कृष्यादिभ्यो वलच् ।
२८ लोमपिच्छादेः शेलम् ।
२९ नोऽङ्गादेः ।
३० शाकीपलालीदद्रूर्ह्रस्वश्च ।
३१ विष्वचो विषुश्च ।
३२ लक्ष्म्या अनः ।
३३ प्रज्ञाश्रद्धार्चावृत्तेर्णः ।
३४ ज्योत्स्नादिभ्योऽण् ।
३५ सिकताशर्करात् ।
३६ इलश्च देशे ।
३७ द्युद्रोर्म्मः ।
३८ काण्डाण्डभाण्डादीरः ।
३९ कच्छ्वा डुरः ।
४० दन्तादुन्नतात् ।
४१ मेधारथान्नवेरः ।
४२ कृपाहृदयादालुः ।
४३ केशाद्वः ।
४४ मण्यादिभ्यः ।
४५ हीनात्स्वाङ्गादः ।
४६ अभ्रादिभ्यः ।
४७ अस्तपोमायामेधास्रजो विन् ।
४८ आमयाद्दीर्घश्च ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४९ स्वान्मिन्नीशे ।
५० गोः ।
५१ ऊर्जो विन्वला-
वस्चान्तः ।
५२ तमिस्त्रार्णव-
ज्योत्स्नाः ।
५३ गुणादिभ्यो यः ।
५४ रूपात्प्रशस्ता-
हतात् ।
५५ पूर्णमासोऽण् ।
५६ गोपूर्वादत इकण् ।
५७ निष्कादेः शत-
सहस्रात् ।
५८ एकादेः कर्म-
धारयात् ।
५९ सर्वादेरिन् ।
६० प्राणिस्थादस्वाङ्गाद्
द्वन्द्वरुग्निन्द्यात् ।
६१ वातातीसारपिशा-
चात्कश्चान्तः ।
६२ पूरणाद्वयसि ।
६३ सुखादेः ।
६४ मालायाः क्षेपे ।
६५ धर्म्मशील वर्णा-
न्तात् ।
६६ बाहूर्वादेर्बलात् ।
६७ मन्माब्जादेर्नाम्नि ।
६८ हस्तदन्तकराज्जातौ
६९ वर्णाद्ब्रह्मचा-
रिणि ।
७० पुष्करादेर्देशे ।
७१ सूक्तसाम्नोरीयः ।
७२ लुब्वाऽध्यायानु-
वाके ।
७३ विमुक्तादेरण् ।
७४ घोषदादेरकः ।
७५ प्रकारे जातीयर् ।
७६ कोऽण्वादेः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७७ जीर्णगोमूत्रावदा-
तसुरायवकृष्णा-
च्छाल्याच्छादन-
सुराहिव्रीहितिले।
७८ भूतपूर्वे प्चरट्।
७९ गोष्ठादीनञ्।
८० षष्ठ्या रूप्यप्चरट्।
८१ व्याश्रये तसुः।
८२ रोगात्प्रतीकारे।
८३ पर्यभेः सर्वोभये।
८४ आद्यादिभ्यः।
८५ क्षेपातिग्रहाव्यथे-
ष्वकर्त्तुस्तृती-
यायाः।
८६ पापहीयमानेन।
८७ प्रतिना पञ्चम्याः।
८८ अहीयरुहोऽपा-
दाने।
८९ किमद्व्यादिस-
र्वाद्यऽवैपुल्यबहोः
पित् तस्।
९० इतोऽतः कुतः।
९१ भवत्वायुष्मद्दीर्घा-
युर्देवानांप्रियैका-
र्थात्।
९२ त्रप्च।
९३ क्वकुत्रात्रेह।
९४ सप्तम्याः।
९५ किंयत्तत्सर्वैका-
न्यात्काले दा।
९६ सदाऽधुनेदानींत-
दानीमेतर्हि।
९७ सद्योऽद्यपरेद्यव्यह्नि।
९८ पूर्वापराधरोत्तरा-
न्यान्यतरेतरादे-
द्युस्।
९९ उभयाद् द्युश्च।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१०० ऐषमःपरुत्परारि वर्षे ।

१०१ अनद्यतने र्हिः ।

१०२ प्रकारे था ।

१०३ कथमित्थम् ।

१०४ सङ्ख्याया धा ।

१०५ विचाले च ।

१०६ वैकाद् ध्यमञ् ।

१०७ द्वित्रेर्द्धमञेधौ वा ।

१०८ तद्वति धण् ।

१०९ वारे कृत्वस् ।

११० द्वित्रिचतुरः सुच् ।

१११ एकात्सकृच्चास्य ।

११२ बहोर्द्धासन्ने ।

११३ दिक्शब्दाद्दिग्देशकालेषु प्रथमापञ्चमीसप्तम्याः ।

११४ ऊर्ध्वाद्रिरिष्टातावुपश्चास्य ।

११५ पूर्वावराधरेभ्योऽसस्तातौ पुरवधश्चैषाम् ।

११६ परावरात्स्तात् ।

११७ दक्षिणोत्तराच्चातस् ।

११८ अधरापराच्चात् ।

११९ वा दक्षिणात् प्रथमासप्तम्या आः ।

१२० आही दूरे ।

१२१ वोत्तरात् ।

१२२ अदूरे एनः ।

१२३ लुबञ्चेः ।

१२४ पश्चोऽपरस्य दिक्पूर्वस्य चाति ।

१२५ वोत्तरपदेऽर्द्धे ।

१२६ कृभ्वस्तिभ्यां कर्मकर्तृभ्यां प्रागतत्तत्त्वे च्विः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१२७ अरुर्मनश्चक्षुश्चेतोरहोरजसां लुक् च्वौ।

१२८ इसुसोर्बहुलम्।

१२९ व्यञ्जनस्यान्त ईः।

१३० व्याप्तौ स्सात्।

१३१ जातेः सम्पदा च।

१३२ तत्राधीने।

१३३ देये त्रा च।

१३४ सप्तमीद्वितीयाद्देवादिभ्यः।

१३५ तीयशम्बबीजात्कृगा कृषौ डाच्।

१३६ सङ्ख्यादेर्गुणात्।

१३७ समयाद्यापनायाम्।

१३८ सपत्रनिष्पत्रादतिव्यथने।

१३९ निष्कुलान्निष्कोषणे।

१४० प्रियसुखादानुकूल्ये।

१४१ दुःखात्प्रातिकूल्ये।

१४२ शूलात्पाके।

१४३ सत्यादशपथे।

१४४ मद्रभद्राद्वपने।

१४५ अव्यक्ताऽनुकरणादनेकस्वरात्कृभ्वस्तिना अनितौ द्विश्च।

१४६ इतावतो लुक्।

१४७ न द्वित्वे।

१४८ तो वा।

१४९ डाच्यादौ।

१५० बह्वल्पार्थात्कारकादिष्टानिष्टे प्शस्।

१५१ संख्यैकार्थाद्वीप्सायां शस्।

१५२ सङ्ख्यादेः पादा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिभ्यो दानदण्डे चाकल्लुक् च ।

१५३ तीयाट्टीकण् न विद्या चेत् ।

१५४ निष्फले तिलात्पिञ्जपेजौ ।

१५५ प्रायोऽतोर्द्वयसट्-मात्रट् ।

१५६ वर्णाऽव्ययात् स्वरूपे कारः ।

१५७ रादेफः ।

१५८ नामरूपभागा-द्धेयः ।

१५९ मर्त्तादिभ्यो यः ।

१६० नवादीनतनत्नं च नू चास्य ।

१६१ प्रात्पुराणे नश्च ।

१६२ देवात्तल् ।

१६३ होत्राया ईयः ।

१६४ भेषजादिभ्य-ष्ट्यण् ।

१६५ प्रज्ञादिभ्योऽण् ।

१६६ श्रोत्रौषधिकृष्णा-च्छरीरभेषजमृगे ।

१६७ कर्म्मणः सन्दिष्टे ।

१६८ वाच इकण् ।

१६९ विनयादिभ्यः ।

१७० उपायाद् ह्रस्वश्च ।

१७१ मृदस्तिकः ।

१७२ सस्नौ प्रशस्ते ।

---

तृतीयः पादः ।

१ प्रकृते मयट् ।

२ अस्मिन् ।

३ तयोः समूहवच्च बहुषु ।

४ निन्द्ये पाशप् ।

५ प्रकृष्टे तमप् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



६ द्वयोर्विभज्ये च तरप् ।
७ क्वचित्स्वार्थे ।
८ किन्त्याद्येऽव्यया-दसत्वे तयोरन्त-स्याम् ।
९ गुणाङ्गाद्वेष्ठेयसू ।
१० त्यादेश्च प्रशस्ते रूपप् ।
११ अतमबादेरीषद-समाप्ते कल्पप्दे-श्यप्देशीयर् ।
१२ नाम्नः प्राग् बहुर्वा ।
१३ न तमबादिः कपो-ऽच्छिन्नादिभ्यः ।
१४ अनत्यन्ते ।
१५ यावादिभ्यः कः ।
१६ कुमारीक्रीडने-यसोः ।
१७ लोहितान्मणौ ।
१८ रक्ताऽनित्य-वर्णयोः ।
१९ कालात् ।
२० शीतोष्णादृतौ ।
२१ लूनवियातात्पशौ ।
२२ स्नाताद्वेदसमाप्तौ ।
२३ तनुपुत्राणुबृहती-शून्यात्सूत्रकृत्रि-मनिपुणाच्छाद-नरिक्ते ।
२४ भागेऽष्टमाञ्ञः ।
२५ षष्ठात् ।
२६ माने कश्च ।
२७ एकादाकिन् चासहाये ।
२८ प्रागनित्यात्कप् ।
२९ त्यादिसर्वादेः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वरेष्वन्त्यात्पूर्वोऽक् ।

३० युष्मदस्मदोऽसोभादिस्यादेः ।

३१ अव्ययस्य को द् च ।

३२ तूष्णीकाम् ।

३३ कुत्सिताल्पाज्ञाते ।

३४ अनुकम्पातद्युक्तनीत्योः ।

३५ अजातेर्नृनाम्नो बहुस्वरादियेकेलं वा ।

३६ वोपादेरडाकौ च ।

३७ ऋवर्णोवर्णात्स्वरादेरादेर्लुक् प्रकृत्या च ।

३८ लुक्युत्तरपदस्य कप् ।

३९ लुक्चाऽजिनान्तात् ।

४० षड्वर्जैकस्वरपूर्वपदस्य स्वरे ।

४१ द्वितीयात्स्वरादूर्ध्वम् ।

४२ सन्ध्यक्षरात्तेन ।

४३ शेवलाद्यादेस्तृतीयात् ।

४४ क्वचित्तुर्यात् ।

४५ पूर्वपदस्य वा ।

४६ ह्रस्वे ।

४७ कुटीशुण्डाद्रः ।

४८ शम्या रुरौ ।

४९ कुत्वा डुपः ।

५० कासूगोणीभ्यां तरट् ।

५१ वत्सोक्षाश्वर्षभाद् ह्रासे पित् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५२ वैकाद्द्वयोर्निर्द्धार्ये डतरः।
५३ यत्तत्किमन्यात्।
५४ बहूनां प्रश्ने डतमश्च वा।
५५ वैकात्।
५६ क्तात्तमबादेश्चानत्यन्ते।
५७ न सामिवचने।
५८ नित्यं ञञिनोऽण्।
५९ विसारिणो मत्स्ये।
६० पूगादमुख्यकाञ्ञ्यो द्रिः।
६१ व्रातादस्त्रियाम्।
६२ शस्त्रजीविसंघाञ्ञ्यड् वा।
६३ वाहीकेष्वब्राह्मणराजन्येभ्यः।
६४ वृकाट्टेण्यण्।
६५ यौधेयादेरञ्।
६६ पर्श्वादेरण्।
६७ दामन्यादेरीयः।
६८ श्रुमच्छमीवच्छिखावच्छालावदूर्णावद्विदभृदभिजितो गोत्रेऽणो यञ्।
६९ समासान्तः।
७० न किमः क्षेपे।
७१ नञ्तत्पुरुषात्।
७२ पूजास्वतेः प्राक्टात्।
७३ बहोर्डः।
७४ इच् युद्धे।
७५ द्विदण्ड्यादिः।
७६ ऋक्पूः पथ्यपोऽत्।
७७ धुरोऽनक्षस्य।
७८ सङ्ख्यापाण्डूदक्कृष्णाद्भूमेः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



७९ उपसर्गादध्वनः।
८० समवान्धात्तमसः।
८१ तप्तान्ववाद्रहसः।
८२ प्रत्यन्ववात्सामलोम्नः।
८३ ब्रह्महस्तिराजपल्याद्वर्चसः।
८४ प्रतेरुरसः सप्तम्याः।
८५ अक्ष्णोऽप्राण्यङ्गे।
८६ सङ्कटाभ्याम्।
८७ प्रतिपरोनोरव्ययीभावात्।
८८ अनः।
८९ नपुंसकाद्वा।
९० गिरिनदीपौर्णमास्याग्रहायण्यपञ्चमवर्ग्याद्वा।
९१ संख्याया नदीगोदावरीभ्याम्।
९२ शरदादेः।
९३ जराया जरस् च।
९४ सरजसोपशुनानुगवम्।
९५ जातमहद्वृद्धादुक्षणः कर्मधारयात्।
९६ स्त्रियाः पुंसो द्वन्द्वाच्च।
९७ ऋक्सामर्ग्यजुषधेन्वनडुहवाङ्मनसाऽहोरात्ररात्रिंदिवनक्तंदिवाऽहर्दिवोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारगवम्।
९८ चवर्गदषहः समाहारे।
९९ द्विगोरन्नह्नोऽट्।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१०० द्वित्रेरायुषः।
१०१ वाञ्जलेरलुकः।
१०२ खार्या वा।
१०३ वार्द्धाच्च।
१०४ नावः।
१०५ गोस्तत्पुरुषात्।
१०६ राजन्सखेः।
१०७ राष्ट्राख्याद्ब्रह्मणः
१०८ कुमहद्भ्यां वा।
१०९ ग्रामकौटात्तक्ष्णः।
११० गोष्ठातेः शुनः।
१११ प्राणिन उपमानात्।
११२ अप्राणिनि।
११३ पूर्वोत्तरमृगाच्च सक्थ्नः।
११४ उरसोऽग्रे।
११५ सरोऽनोऽश्माऽयसोजातिनाम्नोः।
११६ अह्नः।
११७ सङ्ख्यातादह्नश्च वा।
११८ सर्वांशसङ्ख्याऽव्ययात्।
११९ सङ्ख्यातैकपुण्यवर्षादीर्घाच्च रात्रेरत्।
१२० पुरुषायुषद्विस्तावत्रिस्तावम्।
१२१ श्वसो वसीयसः।
१२२ निसश्च श्रेयसः।
१२३ नञोऽव्ययात्सङ्ख्याया डः।
१२४ सङ्ख्याऽव्ययादङ्गुलेः
१२५ बहुव्रीहेः काष्ठे टः।
१२६ सक्थ्यक्ष्णः स्वाङ्गे।
१२७ द्वित्रिमूर्ध्नो वा।
१२८ प्रमाणीसङ्ख्याड्डः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१२९ सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रैणीपदाऽजपदप्रोष्ठपदभद्रपदम्।

१३० पूरणीभ्यस्तत्प्राधान्येऽप्।

१३१ नञ्सुव्युपत्रेश्चतुरः।

१३२ अन्तर्बहिर्भ्यां लोम्नः।

१३३ भान्नेतुः।

१३४ नाभेर्नाम्नि।

१३५ नञ्बह्वोर्ऋचो माणवचरणे।

१३६ नञ्सुदुर्भ्यः सक्थिसक्थिहलेर्वा।

१३७ प्रजाया अस्।

१३८ मन्दाल्पाच्च मेधायाः।

१३९ जातेरीयः सामान्यवति।

१४० भृतिप्रत्ययान्मासादिकः।

१४१ द्विपदाद्धर्मादन्।

१४२ सुहरिततृणसोमाज्जम्भात्।

१४३ दक्षिणेर्मा व्याधयोगे।

१४४ सुपूत्युत्सुरभेर्गन्धादिद्गुणे।

१४५ वागन्तौ।

१४६ वाल्पे।

१४७ वोपमानात्।

१४८ पात्पादस्याहस्त्यादेः।

१४९ कुम्भपद्यादिः।

१५० सुसङ्ख्यात्।

१५१ वयसि दन्तस्य

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दतृः ।

१५२ स्त्रियां नाम्नि ।

१५३ श्यावाऽरोकाद्वा ।

१५४ वाग्रान्तशुद्धशुभ्र-
वृषवराहाहिमूषि-
कशिखरात् ।

१५५ संप्राज्जानोर्ज्ञुज्ञौ ।

१५६ वोर्ध्वात् ।

१५७ सुहृद्दुर्हृन्मित्रा-
मित्रे ।

१५८ धनुषो धन्वन् ।

१५९ वा नाम्नि ।

१६० खरखुरान्नासिका-
या नस् ।

१६१ अस्थूलाच्च नसः ।

१६२ उपसर्गात् ।

१६३ वेः सुख्रग्रम् ।

१६४ जायाया जानिः ।

१६५ व्युदः काकुदस्य
लुक् ।

१६६ पूर्णाद्वा ।

१६७ ककुदस्यावस्था-
याम् ।

१६८ त्रिककुद् गिरौ ।

१६९ स्त्रियामूधसो न् ।

१७० इनः कच् ।

१७१ ऋन्नित्यदितः ।

१७२ दध्यूरःसर्पिर्मधू-
पानच्छालेः ।

१७३ पुमनडुन्नौपयोल-
क्ष्म्या एकत्वे ।

१७४ नञोऽर्थात् ।

१७५ शेषाद्वा ।

१७६ न नाम्नि ।

१७७ ईयसोः ।

१७८ सहात्तुल्ययोगे ।

१७९ भ्रातुः स्तुतौ ।

१८० नाडीतन्त्रीभ्यां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वाङ्गे।

१८१ निष्प्रवाणिः।

१८२ सुभ्र्वादिभ्यः।

---

चतुर्थः पादः।

१ वृद्धिः स्वरेष्वादेर्ञ्णितितद्धिते।

२ केकयमित्रयुप्रलयस्य यादेरिय् च।

३ देविकाशिंशपादीर्घसत्रश्रेयसस्तत्प्राप्तावाः।

४ वहीनरस्यैत्।

५ य्वः पदान्तात्प्रागैदौत्।

६ द्वारादेः।

७ न्यग्रोधस्य केवलस्य।

८ न्यङ्कोर्वा।

९ नञस्वाङ्गादेः।

१० श्वादेरिति।

११ इञः।

१२ पदस्यानिति वा।

१३ प्रोष्ठभद्राज्जाते।

१४ अंशाहतोः।

१५ सुसर्वार्द्धाद्राष्ट्रस्य।

१६ अमद्रस्य दिशः।

१७ प्राग्ग्रामाणाम्।

१८ सङ्ख्याधिकाभ्यां वर्षस्याभाविनि।

१९ मानसंवत्सरस्याशाणकुलिजस्यानाम्नि।

२० अर्द्धात्परिमाणस्यानतो वात्वादेः

२१ प्राद्वाहणस्यैये।

२२ एयस्य।

२३ नञः क्षेत्रज्ञेश्वर-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुशलचपलनिपु-
णशुचेः ।
२४ जङ्गलधेनुवलज-
स्योत्तरपदस्य तु
वा ।
२५ हृद्भगसिन्धोः ।
२६ प्राचां नगरस्य ।
२७ अनुशतिकादीना-
म् ।
२८ देवतानामात्वादौ ।
२९ आतो नेन्द्रवरुणस्य।
३० सारवैक्ष्वाकमैत्रेय-
भ्रौणहत्यधैवत्य-
हिरण्मयम् ।
३१ वान्तमान्तितमा-
न्तितोऽन्तिया-
न्तिषत् ।
३२ विन्मतोर्णीष्ठेयसौ
लुप् ।

३३ अल्पयूनोः कन्वा ।
३४ प्रशस्यस्य श्रः ।
३५ वृद्धस्य च ज्यः ।
३६ ज्यायान् ।
३७ बाढान्तिकयोः
साधनेदौ ।
३८ प्रियस्थिरस्फिरोरु-
गुरुबहुलतृप्रदीर्घ-
वृद्धवृन्दारकस्ये-
मनि च प्रास्था-
स्फावरगरवंहत्रप-
द्राघवर्षवृन्दम् ।
३९ पृथुमृदुभृशकृश-
दृढपरिवृढस्य
ऋतो रः
४० बहोर्णीष्ठे भूय् ।
४१ भूर्लुक्चेवर्णस्य
४२ स्थूलदूरयुवह्रस्व-
क्षिप्रक्षुद्रस्यान्त-

For Private and Personal Use Only

स्थादेर्गुणश्चनामि-
नः ।
त्र्यन्तस्वरादेः ।
नैकस्वरस्य ।
दण्डिहस्तिनोरा-
यने ।
वाशिन आयनौ ।
एये जिह्माशिनः ।
ईनेऽध्वात्मनोः ।
इकण्यथर्वणः ।
यूनोऽके ।
अनोऽट्ये ये ।
अणि ।
संयोगादिनः ।
गाथिविदथिके-
शिपणिगणिनः ।
अनपत्ये ।
उक्ष्णोर्लुक् ।
ब्रह्मणः ।

५८ जातौ ।
५९ अचर्मणो मनोऽ-
पत्ये ।
६० हितनाम्नोवा ।
६१ नोऽपदस्य तद्धिते ।
६२ कलापिकुथुमितैत-
लिजाजलिलाङ्ग-
लिशिखण्डिशि-
लालिसब्रह्मचारि-
पीठसर्प्पिसूकर-
सद्मसुपर्वणः ।
६३ वाऽमनो विकारे ।
६४ चर्मशुनः कोशस-
ङ्कोचे ।
६५ प्रायोऽव्ययस्य ।
६६ अनीनादट्यह्नोऽतः ।
६७ विंशतेस्तेर्डिति ।
६८ अवर्णेवर्णस्य ।
६९ अकद्रूपाण्ड्वोरुव-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



र्णस्यैये ।

७० अस्वयम्भुवोऽव् ।

७१ ऋवर्णोवर्णदोसिसुसशश्वदकस्मात्त इकस्येतोलुक् ।

७२ असकृत्संभ्रमे ।

७३ भृशाभीक्ष्ण्याविच्छेदे द्विः प्राक्तमबादेः ।

७४ नानावधारणे ।

७५ आधिक्यानुपूर्व्ये ।

७६ डतरडतमौ समानां स्त्रीभावप्रश्ने ।

७७ पूर्वप्रथमावन्यतोऽतिशये ।

७८ प्रोपोत्सम्पादपूरणे

७९ सामीप्येऽधोऽध्युपरि ।

८० वीप्सायाम् ।

८१ प्लुप्चादावेकस्यस्यादेः ।

८२ द्वन्द्वं वा ।

८३ रहस्यमर्यादोक्तिव्युत्क्रान्तियज्ञपात्रप्रयोगे ।

८४ लोकज्ञातेऽत्यन्तसाहचर्ये ।

८५ आबाधे ।

८६ नवा गुणः सदृशे रित् ।

८७ प्रियसुखं चाकृच्छ्रे ।

८८ वाक्यस्य परिवर्जने ।

८९ सम्मत्यसूयाकोपकुत्सनेष्वाद्यामन्त्र्यमादौ स्वरेष्वन्त्यश्च प्लुतः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



९० भर्त्सने पर्यायेण।
९१ त्यादेः साकाङ्क्षस्याङ्गेन।
९२ क्षियाशीः प्रैषे।
९३ चितीवार्थे।
९४ प्रतिश्रवणनिगृह्यानुयोगे।
९५ विचारे पूर्वस्य।
९६ ओमः प्रारम्भे।
९७ हेः प्रश्नाख्याने।
९८ प्रश्ने च प्रतिपदम्।
९९ दूरादामन्त्र्यस्य गुरुर्वैकोऽनन्त्योऽपिलन्टत्।
१०० हेहैष्वेषामेव।
१०१ अस्त्रीशूद्रे प्रत्यभिवादे भोगोत्रनाम्नो वा।
१०२ प्रश्नार्चाविचारे च सन्धेयसन्ध्यक्षरस्यादिदुत्परः।
१०३ तयोर्य्वौ स्वरे संहितायाम्।
१०४ पञ्चम्या निर्दिष्टे परस्य।
१०५ सप्तम्या पूर्वस्य।
१०६ षष्ठ्याऽन्त्यस्य।
१०७ अनेकवर्णः सर्वस्य।
१०८ प्रत्ययस्य।
१०९ स्थानीवावर्णविधौ।
११० स्वरस्य परे प्राग्विधौ।
१११ न सन्धिङीयक्विद्विदीर्घासद्विधावस्क्लुकि।
११२ लुप्यय्वृल्लेनत्।
११३ विशेषणमन्तः।
११४ सप्तम्या आदिः।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



११५ प्रत्ययः प्रकृत्यादेः।

११६ गौणो ङ्यादिः।

११७ कृत्सगतिकारकस्यापि।

११८ परः।

११९ स्पर्द्धे।

१२० आसन्नः।

१२१ सम्बन्धिनां सम्बन्धे।

१२२ समर्थः पदविधिः।

इति श्री हेमचन्द्राचार्यविरचितसिद्धहेमचन्द्र शब्दानुशासनसूत्राणि समाप्तानि।

## समाप्तोऽयं सप्तमोऽध्यायः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# ॥ अनुबन्धफलम् ॥

उच्चारणेऽस्त्यवर्णाद्य आस्त्क्योरिण्निषेधने ।
इकारादात्मनेपदमीकाराच्चोभयं भवेत् ॥१॥

उदितःस्वरान्नोन्तश्चोस्क्तादाविटो विकल्पनं ।
रुपान्त्ये ङे परे ह्रस्व ऋकारादङ्विकल्पकः ॥२॥

ऌकारादङ्समायात्येः सिचि वृद्धिनिषेधकः ।
ऐस्क्तयोरिण्निषेधः स्यादोस्क्तयोस्तस्य नो भवेत् ॥३॥

औकार इड्विकल्पार्थेऽनुस्वारोऽनिड्विशेषणे ।
ॡकारश्च विसर्गश्चानुबन्धे भवतो नहि ॥४॥

कोदादिर्न गुणी प्रोक्तः खे पूर्वस्य मुमागमः ।
गेनोभयपदी प्रोक्तो घश्च चजोः कगौ कृतौ ॥५॥

आत्मने गुणारोधे ङश्चो दिवादिग्णो भवेत् ।
ञौ वृद्धौ वर्त्तमाने क्तः टः स्वादिष्ठ्युकारकः ॥६॥

त्रिमगर्थोडकारःस्याण् णचुरादिश्च वृद्धिकृत् ।
तस्तुदादौ नकारश्चेच्चापुंसीति विशेषणे ॥७॥

रुधादौ नागमे पो हि मो दामः सम्प्रदानके ।
यस्तनादेरकारः स्यात् पुंवद्भावार्थसूचकः ॥८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्त्रीलिङ्गार्थे लकारो हि उत औविंति वो भवेत् ।
शः क्रयादिः क्यः शिति प्रोक्तः षः षितोऽङ्विशेषणे ॥
पदत्वार्थे सकारो हि नोक्ता अत्र न सन्ति च ।
धातुनां प्रत्ययानां चानुबन्धः कथितो मया ॥३०॥

। इत्यनुबन्धफलम् ।

द्युतादेरद्यतन्यां चाऽऽत्मनेपदमिष्यते ।
वृदादिपश्चकेऽन्यो वा स्यसनोरात्मनेपदम् ॥१॥
ज्वलादिर्णौ भवेद्वृद्धि र्यजादेः सम्प्रसारणं ।
घटादीनां भवेद्ह्रस्वो णौ परेऽजीघटत् सदा ॥२॥
अद्यतन्यां पुषादित्वादङ् परस्मैपदे भवेत् ।
स्वादित्वाच्च क्तयोस्तस्य नकारः प्रकटो भवेत् ॥३॥
प्वादिनां गदितो ह्रस्वो ल्वादेस्क्तक्तयोश्च नो भवेत् ।
युजादयो विकल्पेन ज्ञेयाश्चुरादिके गणे ॥४॥
मुचादेर्नागमोरो च कुटादित्वात् सिचि परे ।
गुणवृद्धेरभावश्च कथितो हेमसूरिणा ॥५॥
अदन्तानां गुणो वृद्धिर्यङ्चुरादिश्च नो भवेत् ।
संक्षेपेण फलं चैतदीषितं वानरेण हि ॥६॥

। इति वृत्‌गणफलम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्विश्रिडीशीयुरुक्षुक्ष्णुणुस्नुभ्यश्च वृगो वृङः ।
ऊदृदन्तयुजादिभ्यः स्वरान्ता धातवोऽपरे ॥१॥
पाठ एकस्वराः स्युर्येऽनुस्वारेत इमे स्मृताः ।
द्विविधोऽपि शकिश्चैवं, वचिर्विचिरिची पचिः ॥२॥

सिञ्चतिर्मुचिरतोऽपि पृच्छति
भ्रस्जिमस्जि भुजयोयुजिर्यजिः ।
त्वञ्जिरञ्जिरुजयोर्निजिर्विजिः
षञ्जि भञ्जिभजयः सृजित्यजी ॥३॥

स्कन्दिविद्यविद्लविन्तयोर्नुदिः
स्विद्यतिः शदिसदी भिदिच्छिदी ।
तुद्यदी पदिहदी खिदिक्षुदी
राधिसाधि सुधयो युधिव्यधी ॥४॥

बन्धिबुध्यरुधयः क्रुधिक्षुधी
सिध्यतिस्तदनु हन्तिमन्यती ।
आपिना तपिशपिक्षिपिच्छुपो ।
लुम्पतिः सृपिलिपी वपिस्वपी ॥५॥

यभिरभिलभियमिरमिनमिगमयः
कुशिलिशिरुशिरिशिदिशतिदशयः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्पृशिमृशतिविशतिदृशिशिष्लशुषय-
स्त्विषिपिषिविष्लक्रुषितुषिदुषिपुषयः ॥६॥
श्लिष्यतिर्द्विषिरतोघसिवसती
रोहतिर्लुहिरिही अनिङ्गदितौ ।
देग्धिदोग्धिलिहयोर्मिहिवहती
नह्यतिर्दहिरिति स्फुटमनिटः ॥७॥

इति अनिट्कारिका ॥

## ॥ अथ संग्रहश्लोकाः ॥

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥१॥
निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते ।
तद्वदस्तु यदेकत्वं विभक्तिस्तत्र वर्त्तते ॥२॥
ऊर्ध्वं मानं किलोन्मानं परिमाणं तु सर्वतः ।
आयामस्तु प्रमाणं स्यात् सङ्ख्याबाह्या तु सर्वतः ॥३॥
अविकारो द्रवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते ।
च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आकृतिग्रहणाज्जातिर्लिङ्गानां न च सर्वभाक् ।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥५॥
सत्वे निविशतेऽपैति पृथग्जातिषु दृश्यते ।
आधेयश्चाक्रियाजश्च सोऽसत्वप्रकृतिर्गुणः ॥६॥
इदमस्तु सन्निकृष्टं समीपतरवर्ति चैतदो रूपं ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात् ॥७॥
नकारजावनुस्वारपञ्चमौ धुटि धातुषु ।
सकारजः शकारश्चे षाट्टवर्गस्तवर्गजः ॥८॥
उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।
विहाराहारसंहारप्रहारप्रतिहारवत् ॥९॥
धात्वर्थो बाधते कश्चित् कश्चित्तमनुवर्त्तते ।
तमेव विशिनष्ट्यन्योऽनर्थकोऽन्यः प्रयुज्यते ॥१०॥
फलव्यापारयोरेक निष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मकउदाहृतः ॥११॥
धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥१२॥
नीहृवहिकृषोण्यन्तादुहिब्रूपृच्छिभिक्षिचिरुधिशास्वर्थाः ।
पचियाचिदण्डिकृग्रहमथिजिप्रमुखा द्विकर्माणः ॥१३॥
न्यादीनां कर्मणो मुख्यं प्रत्ययो वक्ति कर्मजः ।
नयते गौर्द्विजैर्ग्रामं भारो ग्राममथोह्यते ॥१४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गौणं कर्मदुहादीनां प्रत्ययो वक्ति कर्मजः ।
गौः पयो दुह्यतेऽनेन शिष्योऽर्थं गुरुणोच्यते ॥१५॥

बीजकालेषु सम्बद्धा यथा लाक्षा रसादयः ।
वर्णादिपरिणामेन फलानामुपकुर्वते ॥१६॥

बुद्धिस्थादपि सम्बद्धात्तथा धातूपसर्गयोः ।
अभ्यन्तरि कृतो भेदः पदकाले प्रकाश्यते ॥१७॥

निपाताश्चोपसर्गाश्च धातवश्चेत्यमी त्रयः ।
अनेकार्थाः स्मृताः सर्वे पाठस्तेषां निदर्शनम् ॥१८॥

प्रपरापसमन्ववनिर्दुर्भि, र्व्यधिसूदतिनिप्रतिपर्यपयः ।
उपआङिति विंशतिरेषसखे उपसर्गगणःकथितःकविभिः

इति संग्रहश्लोकाः ॥

For Private and Personal Use Only

कलिकालसर्वज्ञ विरचित **श्रीसिद्धहेमचंद्र** व्याकरणस्थ–

# न्यायसंग्रहः ॥

स्वं रूपं शब्दस्याशब्दसंज्ञा ॥१॥
सुसर्वार्द्धदिक्शब्देभ्यो जनपदस्य ॥२॥
ऋतोर्वृद्धिमद्विधाववयवेभ्यः ॥३॥
स्वरस्य ह्रस्वदीर्घप्लुताः ॥४॥
आद्यन्तवदेकस्मिन् ॥५॥
प्रकृतिवदनुकरणम् ॥६॥
एकदेशविकृतमनन्यवत् ॥७॥
भूतपूर्वकस्तद्वदुपचारः ॥८॥
भाविनि भूतवदुपचारः ॥९॥
यथासङ्ख्यमनुदेशः समानाम् ॥१०॥
विवक्षातः कारकाणि ॥११॥
अपेक्षातोऽधिकारः ॥१२॥
अर्थवशाद्विभक्तिपरिणामः ॥१३॥
अर्थवद्ग्रहणे नानर्थकस्य ॥१४॥
लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥१५॥
नामग्रहणे लिङ्गविशिष्टस्यापि ॥१६॥
प्रकृतिग्रहणे यङ्लुबन्तस्यापि ॥१७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिवा शवाऽनुबन्धेन निर्दिष्टं यद् गणेन च।
एकस्वरनिमित्तं च पञ्चैतानि न यङ्लुपि ॥१८॥
सन्निपातलक्षणोविधिरनिमित्त तद्विघातस्य ॥१९॥
असिद्धं बहिरङ्गमन्तरङ्गे ॥२०॥
न स्वरानन्तर्ये ॥२१॥
गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः ॥२२॥
कृत्रिमाकृत्रिमयोः कृत्रिमे ॥२३॥
क्वचिदुभयगतिः ॥२४॥
सिद्धेसत्यारम्भो नियमार्थः ॥२५॥
धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम् ॥२६॥
नञुक्तं तत्सदृशे ॥२७॥
उक्तार्थानामप्रयोगः ॥२८॥
निमित्ताभावे नैमित्तिकस्यायाप्यभावः ॥२९॥
सन्नियोगशिष्टानामेकापायेऽन्यतरस्याप्यपायः॥३०॥
नान्वाचीयमाननिवृत्तौ प्रधानस्य ॥३१॥
निरनुबन्धग्रहणे न सानुबन्धकस्य ॥३२॥
एकानुबन्धग्रहणे न द्व्यनुबन्धकस्य ॥३३॥
नानुबन्धकृतान्यसारूप्यानेकस्वरत्वानेकवर्णत्वानि ॥
समासान्तागमसंज्ञाज्ञापकगणनञ्निर्दिष्टान्यनित्यानि॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वेऽपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान् ॥
मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्॥३७॥
यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते ॥३८॥
यस्य तु विधेर्निमित्तमस्ति नासौ विधिर्बाध्यते॥३९॥
येन नाप्राप्ते यो विधिरारभ्यते स तस्यैव बाधकः ॥
बलवन्नित्यमनित्यात् ॥४१॥
अन्तरङ्गं बहिरङ्गात् ॥४२॥
निरवकाशं सावकाशात् ॥४३॥
वार्णात्प्राकृतम् ॥४४॥
श्वृद् श्वृदाश्रयं च ॥४५॥
उपपदविभक्तेः कारकविभक्तिः ॥४६॥
लुबन्तरङ्गेभ्यः ॥४७॥
सर्वेभ्यो लोपः ॥४८॥
लोपात्स्वरादेशः ॥४९॥
आदेशादागमः ॥५०॥
आगमात्सर्वादेशः ॥५१॥
परान्नित्यम् ॥५२॥
नित्यादन्तरङ्गम् ॥५३॥
अन्तरङ्गाच्चानवकाशम् ॥५४॥
उत्सर्गादपवादः ॥५५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपवादात् क्वचिदुत्सर्गोऽपि ॥५६॥
नानिष्टार्था शास्त्रप्रवृत्तिः ॥५७॥
प्रकृतिग्रहणे स्वार्थिकप्रत्ययान्तानामपि ग्रहणम् ॥५८॥
प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ॥५९॥
अदाद्यनदाद्योरनदादेरेव ॥६०॥
प्राकरणिकाप्राकरणिकयोः प्राकरणिकस्यैव ॥६१॥
निरनुबन्धग्रहणे सामान्येन ॥६२॥
साहचर्यात् सदृशस्यैव ॥६३॥
वर्णग्रहणे जातिग्रहणम् ॥६४॥
वर्णैकदेशोऽपि वर्णग्रहणेन गृह्यते ॥६५॥
तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥६६॥
आगमा यद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥६७॥
स्वाङ्गमव्यवधायि ॥६८॥
उपसर्गो न व्यवधायी ॥६९॥
येन नाव्यवधानं तेन व्यवहितेऽपि स्यात् ॥७०॥
ऋकारापदिष्टं कार्यं ऌकारस्यापि ॥७१॥
सकारापदिष्टं कार्यं तदादेशस्य शकारस्यापि ॥७२॥
ह्रस्वदीर्घापदिष्टं कार्यं न प्लुतस्य ॥७३॥
संज्ञोत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्यैव
ग्रहणं न तदन्तस्य ॥७४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्रहणवता नाम्ना न तदन्तविधिः ॥७५॥
अनिनस्मन्ग्रहणान्यर्थवताऽनर्थकेन च तदन्तविधिं
प्रयोजयन्ति ॥७६॥
गामादाग्रहणेष्वविशेषः ॥७७॥
श्रुतानुमितयोः श्रौतो विधिर्बलीयान् ॥७८॥
अन्तरङ्गानपि विधीन् यबादेशोबाधते ॥७९॥
सकृद्गते स्पर्द्धे यद्बाधितं तद्बाधितमेव ॥८०॥
द्वित्वे सति पूर्वस्य विकारेषु बाधको न बाधकः ॥
कृतेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाद्
वृद्धिस्तबाध्योऽट् च ॥८२॥
पूर्वं पूर्वोत्तरपदयोः कार्यं कार्यं पश्चात्सन्धिकार्यम् ॥
संज्ञा न संज्ञान्तरबाधिका ॥८४॥
सापेक्षमसमर्थम् ॥८५॥
प्रधानस्य तु सापेक्षत्वेऽपि समासः ॥८६॥
तद्धितीयो भावप्रत्ययः सापेक्षादपि ॥८७॥
गतिकारकङस्युक्तानां विभक्त्यन्तानामेव कृदन्तैर्वि-
भक्त्युत्पत्तेः प्रागेव समासः ॥८८॥
समासतद्धितानां वृत्तिर्विकल्पेन वृत्तिविषये च
नित्यैवापवादवृत्तिः ॥८९॥
आदशभ्यः सङ्ख्या सङ्ख्येये वर्त्तते न सङ्ख्याने ॥९०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकशब्दस्यासङ्ख्यात्वं क्वचित् ॥९१॥

णौ यत्कृतं कार्यं तत्सर्वं स्थानिवद्भवति ॥९२॥

द्विर्बद्धं सुबद्धं भवति ॥९३॥

आत्मनेपदमनित्यम् ॥९४॥

क्विपि व्यञ्जनकार्यमनित्यम् ॥९५॥

स्थानिवद्भावपुंवद्भावैकशेषद्वन्द्वैकत्वदीर्घत्वान्यनित्यानि ॥९६॥

अनित्यो णिज्चुरादीनाम् ॥९७॥

णिलोपोऽप्यनित्यः ॥९८॥

णिच्सन्नियोगे एव चुरादीनामदन्तता ॥९९॥

धातवोऽनेकार्थाः ॥१००॥

गत्यार्था ज्ञानार्थाः ॥१०१॥

नाम्नां व्युत्पत्तिरव्यवस्थिता ॥१०२॥

उणादयो अव्युत्पन्नानि नामानि ॥१०३॥

शुद्धधातूनामकृत्रिमं रूपम् ॥१०४॥

क्विबन्ता धातुत्वं नोज्झन्ति शब्दत्वं च प्रतिपद्यन्ते ॥

उभयस्थाननिष्पन्नोऽन्यतरव्यपदेशभाक् ॥१०६॥

अवयवे कृतं लिङ्गं समुदायमपि विशिनष्टि चेत्तं समुदायं सोऽवयवो न व्यभिचरति ॥१०७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येन धातुना युक्ताः प्रादयस्तं प्रत्येवोपसर्गसंज्ञाः ॥
यत्रोपसर्गत्वं न सम्भवति तत्रोपसर्गशब्देन प्रादयो लक्ष्यन्ते न तु सम्भवत्युपसर्गत्वे ॥१०९॥
शीलादिप्रत्ययेषु नासरूपोत्सर्गविधिः ॥११०॥
त्यादिष्वन्योऽन्यं नासरूपोत्सर्गविधिः ॥१११॥
स्त्रीखलना अलो बाधकाः स्त्रियाः खलनौ ॥११२॥
यावत्सम्भवस्तावद्विधिः ॥११३॥
सम्भवे व्यभिचारे च विशेषणमर्थवत् ॥११४॥
सर्वं वाक्यं सावधारणम् ॥११५॥
परार्थे प्रयुज्यमानः शब्दो वतमन्तरेणापि वदर्थं गमयति ॥११६॥
द्वौ नञौ प्रकृतमर्थं गमयतः ॥११७॥
चकारो यस्मात्परस्तत्सजातीयमेव समुच्चिनोति ॥११८॥
चानुकृष्टं नानुवर्त्तते ॥११९॥
चानुकृष्टेन न यथासङ्ख्यम् ॥१२०॥
व्याख्यातो विशेषार्थप्रतिपत्तिः ॥१२१॥
यत्रान्यत्क्रियापदं न श्रूयते तत्रास्तिर्भवन्तीपरः प्रयुज्यते ॥१२२॥
यदुपाधेर्विभाषा तदुपाधेः प्रतिषेधः ॥१२३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्य येनाभिसम्बन्धो दूरस्थस्यापि तेन सः ॥१२४॥

येन विना यन्न भवति तत्तस्यानिमित्तस्यापि निमित्तम् ॥१२५॥

नामग्रहणे प्रायेणोपसर्गस्य न ग्रहणम् ॥१२६॥

सामान्यातिदेशे विशेषस्य नातिदेशः ॥१२७॥

सर्वत्रापि विशेषेण सामान्यं बाध्यते न तु सामान्येन विशेषः ॥१२८॥

ङित्वेन कित्वं बाध्यते ॥१२९॥

परादन्तरङ्गं बलीयः ॥१३०॥

प्रत्ययलोपेऽपि प्रत्ययलक्षणं कार्यं विज्ञायते ॥१३१॥

विधिनियमयोर्विधिरेव ज्यायान् ॥१३२॥

अनन्तरस्यैव विधिर्निषधो वा ॥१३३॥

पर्जन्यवल्लक्षणप्रवृत्तिः ॥१३४॥

न केवला प्रकृतिः प्रयोक्तव्या ॥१३५॥

क्विबर्थं प्रकृतिरेवाह ॥१३६॥

द्वन्द्वात्परः प्रत्येकमभिसम्बध्यते ॥१३७॥

विचित्राः शब्दशक्तयः ॥१३८॥

किं हि वचनान्न भवति ॥१३९॥

न्यायाः स्थविरयष्टिप्रायाः ॥१४०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यविरचितं-

# लिङ्गानुशासनम् ।

पुंलिङ्गं कटणथपभमयरषसस्वन्तमिमनलौ किश्तिव् ।
ननङौ घघञौ दः किर्भावे खोऽकर्तरि च कः स्यात् ॥१॥

हस्तस्तनौष्ठनखदन्तकपोलगुल्फ-
केशाध्वगुच्छदिनसर्तुपतद्ग्रहाणाम् ।
निर्यासनाकरसकण्ठकुठारकोष्ठ-
हैमारिवर्षविषबोलरथाशनीनाम् ॥२॥

श्वेतप्लवात्ममुरजासिकफाभ्रपङ्क-
मन्थत्विषां जलधिशेवधिदेहभाजाम् ।
मानद्रुमाद्रिविषयाशुगशोणमास-
धान्याध्वराग्निमरुतां सभिदां तु नाम ॥३॥

बर्होऽच्छदेऽहिर्विप्रे व्रीहग्न्योर्हायनबर्हिषौ ।
मस्तुः सक्तौ स्फटिकेऽच्छो, नीलमित्रौ मणीनयोः ॥४॥

कोणेऽस्त्रश्वषके कोशस्तलस्तालचपेटयोः ।
अनातोद्ये घनो भूम्नि, दारप्राणासुवल्वजाः ॥५॥

कान्तश्चन्द्रार्कनामायःपरो यानार्थतो युगः ।
यश्च स्यादसमाहारे, द्वन्द्वोऽश्ववडवाविति ॥६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वाकोत्तरा नक्तकरल्लकाङ्का, न्युङ्खोत्तरा सङ्गतरङ्गरङ्गाः ।
परागपूगौ सृगमस्तुलङ्गकुडङ्गकालिङ्गतमङ्गमङ्गाः ॥७॥
वेगसमुद्रावपाङ्गवर्गौ घार्घा मञ्चसपुच्छपिच्छगाच्छाः ।
वाजौजकिलिञ्जपुञ्जमुञ्जा अवटः पट्टहठप्रकोष्ठकोष्ठाः ॥८॥
अङ्गुष्ठगण्डौ लगुडप्रगण्डकरण्डकूष्माण्डगुडाः शिखण्डः ।
वरण्डरुण्डौ च पिचण्डनाडीव्रणौ गुणभ्रूणमलक्तकुन्तौ ॥९॥
पोतः पिष्टातः पृषतश्चोत्पातव्रातावर्थकपर्दौ ।
बुद्‌बुदगदमगदो मकरन्दो, जनपदगन्धस्कन्धमगाधः ॥१०॥
अर्धसुदर्शनदेवनमह्लाभिजनजनाः परिधातनफेनौ ।
पूपापूपौ सूपकलापौ रेफः शोफः स्तम्बनितम्बौ ॥११॥
शम्बाम्बौ पाञ्चजन्यतिष्यौ पुष्यः सिच्चयनिकाय्यरात्रवृत्राः ।
मन्त्रामित्रौ कटप्रपुण्ड्राऽऽराः कल्लोलोल्लौ च खल्लतल्लौ ॥१२॥

कण्डोलपोटगलपुद्गलकालचाला-
वेला गलो जगलहिंगुलगोलफालाः ।
स्याद्देवलो बहुलतण्डुलपत्रपाल-
वातूलतालजडुला भृमलो निचोलः ॥१३॥

कामलकुद्दालावयवस्वाः, स्रुवरौरवयावाः शिवदावौ ।
माधवपणवादीनवहावध्रुवकोटीशांशाः स्पशवंशौ ॥१४॥
कुशोड्डीशपुरोडाशवृषकुल्मासनिष्कुहाः ।
अहर्निर्यूहकलहाः, पक्षराशिवराश्यृषिः ॥१५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुंदुभिर्वमतिवृष्णिपाण्यविज्ञातिरालिकलयोऽञ्जलिर्घृणिः ।
अग्निवह्निक्रमयोऽंह्रि शीदिविग्रन्थिकुक्षिदतयोऽर्ईनिर्ध्वनिः ॥१६॥
गिरिशिश्नुजायुकर्ष्वौ हाहाहूहूश्च नभ्रहूर्गर्मुत ।
पादश्मानावात्मा पाप्मस्थेमोष्मयक्ष्माणः ॥१७॥

इति पुंल्लिङ्गाधिकारः ॥

---

स्त्रीलिङ्गं योनिमद्द्म्रीसेनावल्लितडिन्निशाम् ।
वीचितन्द्रावटुश्रीवाजिह्वाशस्त्रीदयादिशाम् ॥१८॥
शिंशपाद्या नदीवीणाज्योत्स्नाचीरीतिथीधियाम् ।
अङ्गुलीकलशीकङ्गुहिङ्गुपुत्रीसुरानसाम् ॥१९॥
रास्नाशिलावचालालाशिम्बाकृष्णोष्णिकाश्रियाम् ।
स्पृक्कापण्याऽतसीधान्यासरघारोचनाभुवाम् ॥२०॥
हरिद्रामांसिदूर्वाऽऽढकबलाकाकृष्णलागिराम् ।
इत्तु प्राण्यङ्गवाचि स्यादीदूदेकस्वरं कृतः ॥२१॥
पात्रादिवर्जितादन्तोत्तरपदः समाहारे ।
द्विगुरन्नाबन्तान्तो वाऽन्यस्तु सर्वो नपुंसकः ॥२२॥
लिन्मिन्यनिण्यणिस्त्रचुक्ताः, कचित्तिगल्पहस्वकप् ।
विंशत्याद्याशताद्द्वन्द्वे, सा चैक्ये द्वन्द्वमेययोः ॥२३॥
स्रुग्गीतिलताभिदि ध्रुवा, विडनरि वारि घटीभबन्धयोः ।
शल्यध्वनिवाद्यभित्सु तु, क्ष्वेडा दुन्दुभिरक्षबिन्दुषु ॥२४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृह्या शाखापुरेऽस्मन्तेऽन्तिका कीला रताहतौ ।
रज्जौ रश्मिर्यवादिर्दोषादौ गङ्गा सुरागृहे ॥२५॥
अहंपूर्विकादिर्वर्षा, मघा अप्कृत्तिका बहौ ।
वा तु जलौकोऽप्सरसः, सिकतासुमनःसमाः ॥२६॥
गायत्र्यादय इष्टका बृहतिका संवर्तिका सर्ज्जिका-
दूषीके अपि पादुका झिरुकया पर्यस्तिका मानिका ।
नीका कञ्चुलिकाऽलुका कलिकया राका पताकाऽन्धिका-
शूका पूपलिका त्रिका चविकयोल्का पञ्जिका पिण्डिका ॥२७॥
ध्रुवका क्षिपका कर्नानिका, शम्बूका शिबिका गवेधुका ।
कणिका केका विपादिका, मिहिका यूका मक्षिकाऽष्टका ॥२८॥
कूर्चिका कूचिका टीका, कोशिका केणिकोर्मिका ।
जलौका प्राविका धूका, कालिका दीर्घिकोष्ट्रिका ॥२९॥
शलाका वालुकेषीका, विहङ्गिकेषिके उखा ।
परिखा विशिखा शाखा, शिखा भङ्गा सुरुङ्गया ॥३०॥
जङ्घा चञ्चा कच्छा पिच्छा, पिञ्जा गुञ्जा खजा प्रजा ।
झञ्झा घंटा जटा घोण्टा, पोटा भिस्सटया छटा ॥३१॥
विष्ठा मञ्जिष्ठया काष्ठा, पाठा शुण्डा गुडा जडा ।
बेडा वितण्डया दाढा, राढा रीढाऽवलीढया ॥३२॥
घृणोर्णा वर्वणा स्थूणा, दक्षिणा लिखिता लता ।
तृणता त्रिवृता त्रेता, गीता सीता सिता चिता ॥३३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुक्ता वार्ता लताऽनन्ता, प्रसृता मार्जिताऽमृता ।
कन्था मर्यादा गदेक्षुगन्धा गोधा स्वधा सुधा ॥३४॥
सास्ना सूना धाना पम्पा, झम्पा रम्पा प्रपा शिफा ।
कम्बा भम्भा सभा हम्भा, सीमा पामारुमे उमा ॥३५॥
चित्या पद्या पर्या योग्या, छाया माया पेया कक्ष्या ।
दूष्या नस्या शम्या संध्या, रथ्या कुल्या ज्या मङ्गल्या ॥३६॥
उपकार्या जलार्द्रैरा, प्रतिसीरा परम्परा ।
कण्डराऽसृग्धरा होरा, वागुरा शर्करा सिरा ॥३७॥
गुन्द्रा मुद्रा क्षुद्रा भद्रा, भस्त्रा छत्त्रा यात्रा मात्रा ।
दंष्ट्रा फेला वेला मेला, गोला दोला शाला माला ॥३८॥
मेखला सिध्मला लीला, रसाला सर्वेला बला ।
कुहाला शंकुला हेला, शिला सुवर्चला कला ॥३९॥
उपला शारिवा मूर्वा, लट्वा खट्वा शिवा दशा ।
कशा कुशेशा मञ्जूषा, शेषा मूषेषया स्नसा ॥४०॥
वस्नसा विस्रसा भिस्सा, नासा वाहा गुहा स्वाहा ।
कक्षाऽऽमिक्षा रिक्षा राक्षा, भङ्गचावल्यायतिस्त्रोटिः ॥४१॥

पेशिर्वासिर्वसतिविपणी नाभिनाल्यालिपालि-
भल्लिः पल्लिर्भ्रुकुटिशकटी चर्चरिः शाटिभाटी ।
खाटिर्वर्त्तिर्व्रततिवमिशुण्ठीतिरीतिर्वितर्दि-
र्दर्विर्नीविच्छविलिविशठिश्रेठिजात्याजिराजिः ॥४२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुचिः सूचिसाची खनिः खानिखारी,
खलिः कीलितूली क्रमिर्वापिधूली ।
कृषिः स्थालिहिण्डी त्रुटिर्वेदिनान्दी,
किकिः कुक्कुटिः काकलिः शुक्तिपंक्ती ॥४३॥
किखिस्ताडिकम्बी द्युतिः शारिराति-
स्तटिः कोटिविष्टी वटिर्गृष्टिवीथी ।
दर्विल्लरिर्मञ्जरिः पुञ्जिभेरी,
शरारिस्तुरिः पिण्डिमाढी मुषुण्ढिः ॥४४॥
राटिराटिरटविः परिपाटिः,
फालिगालिजनिकाकिनिकानि ।
चारिहानिवलभि प्रधिकम्पी,
चुल्लिचुण्टितरयोऽहतिशाणी ॥४५॥
सनिः सानिमेनी मरिर्मारिरश्रचो-
षधी विद्रधिर्झल्लरिः पारिरभ्रिः ।
शिरोधिः कविः कीर्तिगन्त्रीकबर्यः,
कुमार्याढकी स्वेदनी ह्रादिनीली ॥४६॥
हरिण्यश्मरी कर्तनीस्थग्यपव्यः,
करीर्येकपद्यक्षवत्यः प्रतोली ।
कृपाणीकदल्यौ पलालीहसन्यौ,
बृसी गृध्रसी घर्घरी कर्परी च ॥४७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काण्डी खली मदी घटी, गोणी षण्डाल्येषणी द्रुणी ।
तिलपर्णी केवली खटी, नद्धीरवत्यौ च पातली ॥४८॥

वाली गन्धोली काकली गोष्ठचजाजी-
न्द्राणी मत्स्यण्डी दामनी शिञ्जिनी च ।
शृङ्गी कस्तूरी देहली मौर्व्यतिभ्या-
सन्दी क्षैरेय्यः शष्कुलीदर्दुपर्शू ॥४९॥

कर्णान्दुकच्छू तनुरज्जुचञ्चु-
स्नायुर्जुहूः सीमधुरौ स्फिगर्वाक् ।
द्वार्योदिवौ स्रुक्त्वगृचः शरद्वा-
श्छर्दिर्दरत्पामदृषद्दृशो नौः ॥५०॥

इति स्त्रीलिङ्गाधिकारः ।

---

नलस्तुतत्तसंयुक्तरुयान्तं नपुंसकम् ।
वेधआदीन् विना सन्तं, द्विस्वरं मन्त्रकर्तरि ॥५१॥

धनरत्ननभोऽन्नहृषीकतमोघुसृणाङ्गणशुक्तशुभाम्बुरुहाम् ।
अघगूथजलांशुकदारुमनोबिलपिच्छधनुर्दलतालुहृदाम् ॥५२॥
हलदुःखसुखागुरुहिङ्गुरुचत्वचभेषजतुत्थकुसुम्भदृशाम् ।
मरिचास्थिशिलाभवसृक्कयकृन्नलदान्तिकवल्कलसिध्मयुधाम् ॥५३

सौवीरस्थानकद्वारक्लोमधौतेयकासृजाम् ।
लवणव्यञ्जनफलप्रसूनद्रवतां सभित् ॥५४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरं सद्माङ्गयोश्छत्रशीर्षयोः पुण्डरीकके ।
मधु द्रवे ध्रुवं शश्वत्तर्कयोः खपुरं घटे ॥५५॥
अयूपे दैवेऽकार्यादौ, युगं दिष्टं तथा कट्ठ ।
असे द्वन्द्वं स्थले धन्वारिष्टमद्रुमपक्षिणोः ॥५६॥
धर्मं दानादिके तुल्यभागेऽर्धं ब्राह्मणं श्रुतौ ।
न्याय्ये सारं पद्ममिभबिन्दौ काममनुमतौ ॥५७॥
खलं भुवि तथा लक्षं, वेध्येऽह्नः सुदिनैकतः ।
भूमोऽसंख्यात एकार्थे, पथः संख्याव्ययोत्तरः ॥५८॥
द्वन्द्वैकत्वाव्ययीभावौ, क्रियाऽव्ययविशेषणे ।
कृत्याः क्तानाः खल ञिन्भावे, आ त्वात्त्वादिः समूहजः ॥५९॥
गायत्र्याद्यण्स्वार्थेऽव्यक्तमथानञ्कर्मधारयः ।
तत्पुरुषो बहूनां चेच्छाया शालां विना सभा ॥६०॥
राजवर्जितराजार्थराक्षसादेः परापि च ।
आदावुपक्रमोपज्ञे, कन्थोशीनरनामनि ॥६१॥
सेनाशालासुराच्छायानिशं वोर्णा शशात्परा ।
भाद्रणो गृहतः स्थूणा, संख्याऽदन्ता शतादिका ॥६२॥
मौक्तिकं माक्षिकं सौप्तिकं क्लीतकं,
नाणकं नाटकं खेटकं तोटकम् ।
आह्निकं रूपकं जापकं जालकं,
वेणुकं गैरकं कारकं वास्तुकम् ॥६३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुचकं धान्याकनिःशलाकाऽली-
कालिऽकशल्कोपसूर्यकाल्कम् ।
कवककिबुकतोकतिन्तिडीकै-
डूकं छत्राकत्रिकोल्मुकानि ॥६४॥
मार्द्रीककदम्बके बुकं चिबुकंकुतुकमनूकचित्रके ।
कुहुकं मधुपर्कशीर्षके, शाल्कं कुलकं प्रकीर्णकम् ॥६५॥
हल्लीसकपुष्पके खलिङ्ग, स्फिगमङ्गप्रगचोचबीजपिञ्जम् ।
रिष्टं फाण्टं ललाटमिष्टव्युष्टकरोटक्पीटचीनपिष्टम् ॥६६॥
शृङ्गाटमोरटपिटान्यथ पृष्ठगोष्ठः,
भाण्डाण्डतुण्डशरणग्रहणेरिणानि ।
पिङ्गाणतीक्ष्णलवणद्रविणं पुराणं,
त्राणं शणं हिरणकारणकार्मणानि ॥६७॥
पर्याणर्णघ्राणपारायणानि,
श्रीपर्णोष्णे घोरणक्षूणभूतम् ।
प्रादेशान्ताश्मन्तशीतं निशान्तं
वृन्तं तूस्तं वार्तवाहित्थमुक्थम् ॥६८॥
अच्छोदगोदकुसिदानि कुसीदतुन्द-
वृन्दास्पदं दपदनिम्नसशिल्पतल्पम् ।
कूर्पत्रिविष्टपपरीपवदन्तरीप-
रूपं च पुष्पनिकुरुम्बकुटुम्बशुल्बम् ॥६९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसभनलभशुष्माध्यात्मधामेर्मसूक्ष्मं,
किलिमतलिमतोक्मं युग्मतिग्मं त्रिसंध्यम् ।
किसलयशयनीये सायखेयेन्द्रियाणि,
द्रुवयभयकलत्रद्वापरक्षेत्रसत्रम् ॥७०॥

शृङ्गबेरमजिराभ्रपुष्करं, तीरमुत्तरमगारनागरे ।
स्फारमक्षरकुकुन्दुरोदरप्रान्तराणि शिबिरं कलेवरम् ॥७१॥

सिन्दूरमण्डूरकटीरचामर-
क्रूराणि दूरारवैरचत्वरम् ।
औशीरपातालमुलूखलार्तवे,
सत्त्वं च सान्त्वं दिवकिण्वपौतवम् ॥७२॥

विश्वं बृशं पलिशमर्पिशकिल्विषानु-
तर्षापिषं मिषमृचीषमृजीषशीर्षे ।
पीयूषसाध्वसमहानससाहसानि
कासीसमत्सतरसं यवसं बिसं च ॥७३॥

मन्दाक्षवीक्षमथ सक्थि शयातु यातु,
स्वाद्वाशु तुम्बुरु कशेरु शलालु चालु ।
संयत्ककुन्महदहानि पृषत्पुरीतत्,
पर्वाणि रोम च भसच्च जगल्ललाम ॥७४॥

इति नपुंसकलिङ्गाधिकारः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुंस्त्रीलिङ्गश्चतुर्दशेऽङ्के शङ्कुर्निरये च दुर्गतिः ।
दोर्मूले कक्ष आकरे गञ्जो भूरुहि बाणपिप्पलौ ॥७५॥
नाभिः प्राण्यङ्गके प्रधिर्नेमौ क्वचन वलिर्गृहे कुटः ।
श्रोण्यौषध्योः कटो भ्रमो मोहे पिण्डो वृन्दगोलयोः ॥७६॥
भकनीनिकयोस्तारो, भेऽश्लेषहस्तश्रवणाः ।
कणः स्फुलिङ्गे लेशे च, वराटो रज्जुशास्त्रयोः ॥७७॥
कुम्भः कलशे तरणिः, समुद्रार्कांशुयष्टिषु ।
भागधेयो राजदेये, मेरुजम्ब्वां सुदर्शनः ॥७८॥
करेणुर्गजहस्तिन्योरल्याख्यापत्यतद्धितः ।
लाजवस्त्रदशौ भूम्नीहाद्याः प्रत्ययभेदतः ॥७९॥
शुण्डिकचर्मप्रसेवकौ सल्लकमल्लकवृश्चिका अपि ।
शल्यकघुटिकौ पिपीलिकश्चुलुकहुडुक्कतुरुष्कतिन्दुकाः ॥८०॥

शृङ्गोऽथ लब्धभुजशाटसटाः सृपाटः,
कीटः किटस्फटघटा वरटः किलाटः ।
चोटश्चपेटफटशुण्डगुडाः सशाणाः,
स्युर्वारिपर्णफणगर्तरथाजमोदाः ॥८१॥

विधकूपकलम्बजित्यवर्ध्राः, सहचरमुद्गरनालिकेरहाराः ।
बहुकरक्रसरौ कुठारशारौ, वल्लरशफरमसूरकीलरालाः ॥८२॥
पटोलः कम्बलो भल्लो, दंशो गण्डूषवेतसौ ।
लालसो रभसो वर्तिवितस्तिकुटयस्तृटिः ॥८३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऊर्मिशम्यौ रत्न्यरत्नी अवीचि-
लेख्यण्याणिश्रेणयः श्रोण्यरण्यौ ।
पार्ष्णीशल्यौ शाल्मलिर्यष्टिमुष्टी,
योनीमुन्यौ स्वातिगव्यूतिबस्त्यः ॥८४॥
मेथिर्मेधिमशी मषीषुधी ऋष्टिः पाटलिजाटली अहिः ।
पृश्निस्तिथ्यशनी मणिः सृणिर्मौलिः केलिर्हलीमरीचयः ॥८५।
हन्वाखूः कर्कन्धुः सिन्धुर्मृत्युमन्ववट्वारुः ।
ऊरुः कन्दुः काकुः किष्कुर्बाहुर्गवेधू रा गौर्भाः ॥८६॥

इति स्त्रीपुंसाधिकारः ।

---

पुंनपुंसकलिङ्गोऽब्जः, शङ्खे पद्मोऽब्जसंख्ययोः ।
कंसोऽपुंसि कुशो बर्हिर्बालो ह्रीबेरकेशयोः ॥८७॥
द्वापरः संशये छेदे, पिप्पलो विष्टरोत्तरौ ।
अब्दो वर्षे दरत्रासे, कुकूलस्तुषपावके ॥८८॥
परीवादपर्यङ्कयोर्जन्यतल्पौ,
तपोघर्मवत्सानि माघोष्णहृत्सु ।
वटस्तुल्यतागोलभक्ष्येषु वर्णः,
सितादिस्वराद्यो रणे संपरायः ॥८९॥
सैन्धवो लवणे भूतः, प्रेते तमो विधुन्तुदे ।
स्वदायौ कस्वरे कृच्छ्रं, व्रते शुक्रोऽग्निमासयोः॥९०

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्पूरस्वर्णयोश्चन्द्र, उडावृक्षं छदे दलः ।
धर्मः स्वभावे रुचको, भूषाभिन्मातुलुङ्गयोः ॥९१॥
पाताले वाडवो वर्द्धः, सीसे आमलकः फले ।
पिटजङ्गलसत्त्वानि, पिटकामांसजन्तुषु ॥९२॥
मधुपिण्डौ सुरातन्वोर्नाम शेवालमध्ययोः ।
एकाद्रात्रः समाहारे, तथा सूतककूलकौ ॥९३॥

वैनीतकभ्रमरकौ मरको वलीक-
वल्मीकवल्कपुलकाः फरकव्यलीकौ ।
किञ्जल्ककल्कमणिकस्तबका वितङ्क-
वर्चस्कचूचुकतडाकतटाकतङ्काः ॥९४॥

आलकः फलकमालकालक,
मूलकस्तिलकपङ्कपातकाः ।
कोरकः करककन्दुकान्दुका-
ऽनीकनिष्कचषका विशेषकः ॥९५॥

शाटककण्टकटङ्कविटङ्का, मञ्चकमेचकनाकपिनाकाः ।
पुस्तकमस्तकमुस्तकशाका, वर्णकमोदकमूषिकमुष्काः ॥९६॥

चण्डातकश्चरकरोचककञ्चुकानि,
मस्तिष्कयावककरण्डकतण्डकानि ।
आतङ्कशूकसरकाः कटकः सशुल्कः,
पिण्याकझर्झरकहंसकशङ्खपुङ्खाः ॥९७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नखमुखमधिकाङ्गः संयुगः पद्मरागो,
भगयुगमथ टङ्कोद्योगश्टङ्गा निदाघः ।
क्रकचकवचकूर्चार्धर्चपुच्छोञ्छकच्छाः,
व्रजमुटजनिकुञ्जौ कुञ्जभूर्जाम्बुजाश्च ॥९८॥
ध्वजमलयजकूटाः कालकूटारकूटौ,
कवटकपटखेटाः कर्पटः पिष्टलोष्टौ ।
नटनिकटकिरीटाः कर्बटः कुक्कुटाट्टौ,
कुटजकुटविटानि त्र्यङ्कटः कोट्टकुष्ठौ ॥९९॥
कमठो वारुण्डखण्डषण्डा,
निगडाक्रीडनडप्रकाण्डकाण्डाः ।
कोदण्डतरण्डमण्डमुण्डा,
दण्डाण्डौ दृढवारबाणबाणाः ॥१००॥
कर्षापणः श्रवणपक्वणकंकणानि,
द्रोणापराह्णचरणानि तृणं सुवर्णम् ।
स्वर्णव्रणौ वृषणभूषणदूषणानि,
भाणस्तथा किणरणप्रवणानि चूर्णः ॥१०१॥
तोरणपूर्तनिकेतनिवाताः, पारतमन्तयुतप्रयुतानि ।
क्ष्वेडितमक्षतदैवतवृत्तैरावतलोहितहस्तशतानि ॥१०२॥
व्रतोपवीतौ पलितो वसन्तध्वान्तायुतद्यूतनृतानि पुस्तः ।
शुद्धान्तबुस्तौ रजतो मुहूर्तद्वियूथयूथानि वरूथगूथौ ॥१०३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रस्थं तीर्थं प्रोथमलिन्दः, ककुदः कुकुदाष्टापदकुन्दाः ।
गुदहोहदकुमुदच्छदकन्दार्बुदसौधमथोत्सेधकबन्धौ ॥१०४॥

आह्वायुधान्धौषधगन्धमादन-
प्रस्फोटना लग्नपिधानचन्दनाः ।
वितानराजादनशिश्नयौवना-
पीनोदपानासनकेतनाशनम् ॥१०५॥

नलिनपुलिनमौना वर्धमानः समानौ-
दनदिनशतमाना हायनस्थानमानाः ।
धननिधनविमानास्ताडनस्तेनवस्ना,
भवनभुवनयानोद्यानवातायनानि ॥१०६॥

अभिधानद्वीपिनौ निपानं,
शयनं लशुनरसोनगृञ्जनानि ।
खलिनखलीनानुमानदीपाः,
कुणपः कुतपावापचापशूर्पाः ॥१०७॥

स्तूपोडुपौ विटपमण्डपशष्पबाष्प-
द्वीपानि विष्टपनिपौ शफडिम्बबिम्बाः ।
जम्भः कुसुम्भककुभौ कलभो निभार्म-
संक्रामसंक्रमललामहिमानि हेमः ॥१०८॥

उद्यमकामोद्यामाश्रमकुट्टिमकुसुमसंगमा गुल्मः ।
क्षेमक्षौमौ कम्बलिवाह्यो मैरेयतूर्यौ च ॥१०९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूयाऽजन्यप्रमयसमया राजसूयो हिरण्या-
रण्ये संल्यं मलयवलयौ वाजपेयः कषायः ।
शल्यं कुल्याव्ययकवियवद्गोमयं पारिहार्यः,
पारावारातिखरशिखराः क्षत्रवस्त्रोपवस्त्राः ॥११०॥
अलिंजरः कूबरकूरवेरनीहारहिञ्जीरसहस्रमेढ्राः ।
संसारसीरौ तुवरश्च सूत्रशृङ्गारपद्रान्तरकर्णपूराः ॥१११॥
नेत्रं वक्त्रपवित्रपत्त्रसमरोशीरान्धकारा वरः,
केदारप्रवरौ कुलीरशिशिरावाडम्बरो गह्वरः ।
क्षीरं कोटरचक्रचुक्रतिमिराङ्गारास्तुषारः शर,
भ्राष्ट्रोपह्वरराष्ट्रतक्रजठरार्द्राः कुञ्जरः पञ्जरः ॥११२॥
कर्पूरनूपुरकुटीरविहारवार-
कान्तारतोमरदुरोदरवासराणि ।
कासारकेसरकरीरशरीरजीर-
मञ्जीरशेखरयुगंधरवज्रवप्राः ॥११३॥
आलवालपलभालपलालाः, पल्वलः खलचषालविशालाः ।
शूलमूलमुकुलास्तलतैलौ, तूलकुड्मलतमालकपालाः ॥११४॥
कवलप्रवालबलशम्बलोत्पलो-
पलशीलशैलशकलाङ्कुलाञ्चलाः ।
कमलं मलं मुसलसालकुण्डलाः,
कललं नलं निगलनीलमङ्गलाः ॥११५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काकोलहलाहलौ हलं, कोलाहलकङ्कालवल्कलाः ।
सौवर्चलधूमले फलं, हालाहलजम्बालखण्डलाः ॥११६॥

लाङ्गूलगरलाविन्द्रनीलगाण्डीवगाण्डिवाः ।
उल्वः पारशवः पार्श्वापूर्वन्त्रिदिवताण्डवाः ॥११७॥

निष्ठेवः प्रग्रीवः शरावरावौ भावक्लीवशवानि ।
दैवः पूर्वः पल्लवनल्वौ, पाशं कुलिशं कर्कशकोशौ ॥११८॥

आकाशकाशकणिशाङ्कुशशेषवेषो-
ष्णीषाम्बरीषविषरौहिषमाषमेषाः ।
प्रत्यूषयूषमथ कोषकरीषकर्ष-
वर्षामिषा रसबुसेत्थुसचिक्कसाश्च ॥११९॥

कर्पास आसो दिवसावतंसवीतंसमांसाः पनसोपवासौ ।
निर्यासमासौ चमसांसकांसस्नेहानि बर्हो गृहगेहलोहाः ॥१२०॥

पुण्याहदेहौ पटहस्तनूरुहो,
लक्षाऽररिस्थाणुकमण्डलूनि च ।
चाटुश्चटुर्जन्तुकशिप्वनुस्तथा,
जीवातु कुस्तुम्बरु जानु सानु च ॥१२१॥

कम्बुः सक्तुर्दार्विगुरुर्वास्तु पलाण्डु-
र्हिङ्गुः शिग्रुर्दोस्तितउः सीध्वथ भूमा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेम प्रेम ब्रह्म गरुल्लोम विहायः,
कर्माष्ठीवत्पक्ष्मधनुर्नाममहिम्नी ॥१२२॥

इति पुन्नपुंसकालिङ्गाधिकारः ।

---

स्त्रीक्लीबयोर्नखं शुक्तौ, विश्वं मधुकमौषधे,
माने लक्षं मघौ कल्यं, क्रोडोऽङ्के तिन्दुकं फले ॥
तरलं यवाग्वां पुष्पे, पाटलं पटलं चये ।
वसन्ततिलकं वृत्ते, कपालं भिक्षुभाजने ॥१२३॥
अर्धपूर्वपदो नावष्टचणकर्त्रनटौ क्वचित् ।
चोराद्यमनोज्ञायकञ् , कथानककशेरुके ॥१२४॥
वंशिकवक्रोष्ठिककन्यकुब्जपीठानि नक्तमवहित्थम् ।
रशनं रसनाच्छोदन शुम्बं तुम्बं महोदयं कांस्यम् ॥१२५॥
मृगव्यचव्ये च वणिज्यवीर्यनासीरगात्रापरमन्दिराणि ।
तमिस्रशस्त्रे नगरं मसूरत्वक्क्षीरकादम्बरकाहलानि ॥१२६॥

स्थालीकदल्यौ स्थलजालपित्तला-
गोलायुगल्यौ बडिशं च छर्दि च ।
अलाबु जम्बूडुरुषः सरः सदो,
रोदोऽर्चिषी दाम गुणे त्वयट् तयट् ॥१२७॥

इति स्त्रीनपुंसकलिङ्गाधिकारः ।

---

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वतस्त्रिलिङ्गः सरकोऽनुतर्षे शललः शले ।
करकोऽब्दोपले कोशः, शिम्बा खड्गपिधानयोः ॥१२८॥

जीवः प्राणेषु केदारे, वलजः पवने खलः ।
बहुलं वृत्तनक्षत्रपुराद्याभरणाभिधाः ॥१२९॥

भल्लातक आमलको, हरीतकबिभीतकौ ।
तारकाढकपिटकस्फुलिङ्गा विडङ्कतटौ ॥१३०॥

पटः पुटो वटो वाटः, कपाटशकटौ कटः ।
पेटो मठः कुण्डनीडविषाणास्तूणकङ्कतौ ॥१३१॥

मुस्तकुथेङ्गुदजृम्भदाडिमाः, पिठरप्रतिसरपात्रकंदराः ।
नखरो वल्लरो दरः पुरश्छत्रकुवलमृणालमण्डलाः ॥१३२॥

नालप्रणालपटलार्गलशृङ्खलकन्दलाः ।
पूलावहेलौ कलशकटाहौ षष्टिरेण्विषु ॥१३३॥

इति स्वतस्त्रिलिङ्गाधिकारः ।

---

परलिङ्गो द्वन्द्वोऽशी डेऽर्थो वाच्यवदपत्यमिति नियताः ।
असद्यारोपाभावे गुणवृत्तेराश्रयाद्वचनलिङ्गे ॥१३४॥

प्रकृतेर्लिङ्गवचने बाधन्ते स्वार्थिकाः क्वचित् ।
प्रकृतिर्हरीतक्यादिर्न लिङ्गमतिवर्तते ॥१३५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वचनं तु खलतिकादिर्बह्वर्थोऽव्ययेति पूर्वपदभूता ।
स्त्रीपुंनपुंसकानां सह वचने स्यात् परं लिङ्गम् ॥१३६॥
नन्ता संख्या डतिर्युष्मदस्मच्च स्युरलिङ्गकाः ।
पदं वाक्यमव्ययं चेत्यसंख्यं च तद्बहुलम् ॥१३७॥
निःशेषनामलिङ्गानुशासनान्यभिसमीक्ष्य संक्षेपात् ।
आचार्यहेमचन्द्रः समदृभदनुशासनानि लिङ्गानाम् ॥१३८॥

**इति कलिकालसर्वज्ञाचार्यश्रीहेमचन्द्रविरचितं**
**लिङ्गानुशासनं समाप्तम् ॥**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# श्री काव्यानुशासनसूत्राणि ।

१ अकृत्रिमस्वादुपदां परमार्थाभिधायिनीम् ।
सर्वभाषापरिणतां जैनीं वाचमुपास्महे ॥१॥

२ शब्दानुशासनेऽस्माभिः साध्व्यो वाचो विवेचिताः।
तासामिदानीं काव्यत्वं यथावदनुशिष्यते ॥२॥

३ काव्यमानन्दाय यशसे कान्तातुल्यतयोपदेशाय च ।

४ प्रतिभाऽस्य हेतुः ।

५ सावरणक्षयोपशममात्रात्सहजा ।

६ मन्त्रादेरौपाधिकी ।

७ व्युत्पत्त्यभ्यासाभ्यां संस्कार्या ।

८ लोकशास्त्रकाव्येषु निपुणता व्युत्पत्तिः ।

९ काव्यविच्छिक्षया पुनः पुनः प्रवृत्तिरभ्यासः ।

१० सतोऽप्यनिबन्धोऽसतोऽपि निबन्धो नियमश्छाया-
याद्युपजीवनादयश्च शिक्षाः ।

११ अदोषौ सगुणौ सालंकारौ च शब्दार्थौ काव्यम् ।

१२ रसस्योत्कर्षापकर्षहेतू गुणदोषौ भक्त्या शब्दार्थयोः।

१३ अङ्गाश्रिता अलंकाराः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१४ तत्परत्वे काले ग्रहत्यागयोर्नातिनिर्वाहे निर्वाहेऽप्यङ्गत्वे रसोपकारिणः ।

१५ मुख्यगौणलक्ष्यव्यङ्ग्यार्थभेदान्मुख्यगौणलक्षकव्यञ्जकाः शब्दाः ।

१६ साक्षात्संकेतविषयो मुख्यः ।

१७ मुख्यार्थबाधे निमित्ते प्रयोजने च भेदाभेदाभ्यामारोपितो गौणः ।

१८ मुख्यार्थसंबद्धस्तत्त्वेन लक्ष्यमाणो लक्ष्यः ।

१९ मुख्याद्व्यतिरिक्तः प्रतीयमानो व्यङ्ग्यो ध्वनिः ।

२० मुख्याद्यास्तच्छक्तयः ।

२१ वक्त्रादिवैशिष्ट्यादर्थस्यापि व्यञ्जकत्वम् ।

२२ व्यङ्ग्यः शब्दार्थशक्तिमूलः ।

२३ नानार्थस्य मुख्यस्य शब्दस्य संसर्गादिभिरमुख्यस्य च मुख्यार्थबाधादिभिर्नियमिते व्यापारे वस्त्वलंकारयोर्वस्तुनश्च व्यञ्जकत्वे शब्दशक्तिमूलः पदवाक्ययोः ।

२४ वस्त्वलंकारयोस्तद्व्यञ्जकत्वेऽर्थशक्तिमूलः प्रबन्धेऽपि ।

२५ रसादिश्च ।

इति प्रथमोऽध्यायः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१ विभावानुभावव्यभिचारिभिरभिव्यक्तः स्थायी भावो रसः ।

२ शृङ्गारहास्यकरुणा रौद्रवीरभयानका बीभत्साद्भुतशान्ता नव रसाः ।

३ स्त्रीपुंसमाल्यादिविभावा जुगुप्सालस्यौग्र्यवर्जव्यभिचारिका रतिः संभोगविप्रलम्भात्मा शृङ्गारः ।

४ सुखमयधृत्यादिव्यभिचारी रोमाञ्चाद्यनुभावः सम्भोगः ।

५ शङ्कादिव्यभिचारी सन्तापाद्यनुभावोऽभिलाषमानप्रवासरूपो विप्रलम्भः ।

६ दैवपारवश्याभ्यामाद्यो द्वेधा ।

७ प्रणयेर्ष्याभ्यां मानः ।

८ कार्यशापसम्भ्रमैः प्रवासः ।

९ विकृतवेषादिविभावो नासास्पदनाद्यनुभावो निद्रादिव्यभिचारी हासो हास्यः ।

१० उत्तममध्यमाधमेषु स्मितविहसितापहसितैः स आत्मस्थस्त्रेधा ।

११ एतत्संक्रमजैर्हसितोपहसितातिहसितैः परस्थोऽपि ।

१२ इष्टनाशादिविभावो दैवोपालम्भाद्यनुभावो दुःख-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मयव्यभिचारी शोकः करुणः।

१३ दारापहारादिविभावो नयनरागाद्यनुभाव औग्र्यादिव्यभिचारी क्रोधो रौद्रः।

१४ नयादिविभावः स्थैर्याद्यनुभावो धृत्यादिव्यभिचार्युत्साहो धर्मदानयुद्धभेदो वीरः।

१५ विकृतस्वरश्रवणादिविभावं करकम्पाद्यनुभावं शङ्कादिव्यभिचारि भयं भयानकः।

१६ अहृद्यदर्शनादिविभावाङ्गसंकोचाद्यनुभावापस्मारादिव्यभिचारिणी जुगुप्सा बीभत्सः।

१७ दिव्यदर्शनादिविभावो नयनविस्ताराद्यनुभावो हर्षादिव्यभिचारी विस्मयोऽद्भुतः।

१८ वैराग्यादिविभावो यमनियमाध्यात्मशास्त्रचिन्तनाद्यनुभावो धृत्यादिव्यभिचारी शमः शान्तः।

१९ रतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयशमाः स्थायिनो भावाः।

२० धृतिस्मृतिमतिव्रीडाजाड्यविषादमदव्याधिनिद्रासुप्तौत्सुक्याऽवहित्थशङ्काचापलाऽऽलस्यहर्षगर्वौग्र्यप्रबोधग्लानिदैन्यश्रमोन्मादमोहचिन्ताऽमर्षत्रासाऽपस्मारनिर्वेदाऽऽवेगवितर्काऽसूयामृतयःस्थ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्युदयप्रशमसंधिशबलत्वधर्माणस्त्रयस्त्रिंशद्व्यभि-
चारिणः ।

२१ ज्ञानादेर्धृतिरव्यग्रभोगकृत् ।
२२ सदृशदर्शनादेः स्मृतिर्भ्रूक्षेपादिकृत् ।
२३ शास्त्रचिन्तादेर्मतिः शिष्योपदेशादिकृत् ।
२४ अकार्यकरणज्ञानादेर्व्रीडा वैवर्ण्यादिकृत् ।
२५ इष्टानिष्टदर्शनादेर्जाड्यं तूष्णींभावादिकृत् ।
२६ कार्यभङ्गाद्विषादः सहायान्वेषणमुखशोषादिकृत् ।
२७ मद्योपयोगान्मदः स्वापहास्याऽस्मरणादिकृत् ।
२८ विरहादेर्मनस्तापो व्याधिर्मुखशोषादिकृत् ।
२९ क्लमादेर्निद्रा जृम्भादिकृत् ।
३० निद्रोद्भवं सुप्तमुत्स्वप्नायितादिकृत् ।
३१ इष्टानुस्मरणादेरौत्सुक्यं त्वरादिकृत् ।
३२ लज्जादेरवहित्थमन्यथा कथनादिकृत् ।
३३ चौर्यादेः स्वपरयोः शङ्का पार्श्वविलोकनादिकृत् ।
३४ रागादेश्चापलं वाक्पारुष्यादिकृत् ।
३५ श्रमादेरालस्यं निद्रादिकृत् ।
३६ प्रियागमादेर्हर्षो रोमाञ्चादिकृत् ।
३७ विद्यादेर्गर्वोऽसूयादिकृत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३८ चौर्यादेरौग्र्यं वधादिकृत् ।

३९ शब्दादेः प्रबोधो जृम्भादिकृत् ।

४० व्याध्यादेर्ग्लानिर्वैवर्ण्यादिकृत् ।

४१ दौर्गत्यादेर्दैन्यममृजादिकृत् ।

४२ व्यायामादेः श्रमोऽङ्गभङ्गादिकृत् ।

४३ इष्टवियोगादेरुन्मादोऽनिमित्तस्मितादिकृत् ।

४४ प्रहारादेर्मोहो भ्रमणादिकृत् ।

४५ दारिद्र्यादेश्चिन्ता संतापादिकृत् ।

४६ आक्षेपादेरमर्षः स्वेदादिकृत् ।

४७ निर्घातादेस्त्रासोऽङ्गसंक्षेपादिकृत् ।

४८ ग्रहादेरपस्मारः कम्पादिकृत् ।

४९ रोगादेर्निर्वेदो रुदितादिकृत् ।

५० उत्पातादिभ्यः आवेगो विस्मयादिकृत् ।

५१ संदेहादेर्वितर्कः शिरःकम्पादिकृत् ।

५२ परोत्कर्षादेरसूयावज्ञादिकृत् ।

५३ व्याध्यभिघाताभ्यां मृतिर्हिक्काकार्श्यादिकृत् ।

५४ स्तम्भस्वेदरोमाञ्चस्वरभेद(स्वर)कम्पवैवर्ण्याश्रुप्रलया अष्टौ सात्त्विकाः ।

५५ नरिन्द्रियेषु तिर्यगादिषु चारोपाद्रसभावाभासौ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



५६ अनौचित्याच्च ।

५७ व्यङ्ग्यस्य प्राधान्ये काव्यमुत्तमम् ।

५८ असत्संदिग्धतुल्यप्राधान्ये मध्यमं त्रेधा ।

५९ अव्यङ्ग्यमवरम् ।

इति द्वितीयोऽध्यायः ।

१ रसादेः स्वशब्दोक्तिः क्वचित्संचारिवर्जं दोषः ।

२ अबाध्यत्वे आश्रयैक्ये नैरन्तर्येऽनङ्गत्वे च विभावादिप्रातिकूल्यम् ।

३ विभावानुभावक्लेशव्यक्तिः पुनःपुनर्दीप्त्याकाण्डप्रथाच्छेदाऽङ्गातिविस्तराऽङ्ग्यऽननुसंधानाऽनङ्गाभिधानप्रकृतिव्यत्ययाश्च ।

४ निरर्थकासाधुत्वे पदस्य ।

५ विसंधिन्यूनाऽधिकोक्ताऽस्थानस्थपदपतत्प्रकर्षसमाप्तपुनराऽत्ताविसर्गहतवृत्तसंकीर्णगर्भितभग्नप्रक्रमानन्वितत्वानि वाक्यस्य ।

६ अप्रयुक्ताऽश्लीलाऽसमर्थानुचितार्थश्रुतिकटुक्लिष्टाविमृष्टविधेयांशविरुद्धबुद्धिकृत्त्वान्युभयोः ।

७ कष्टाऽपुष्टव्याहतग्राम्याऽश्लीलसाकाङ्क्षसंदिग्धाऽक्रमपुनरुक्तभिन्नसहचरविरुद्धव्यङ्ग्यप्रसिद्धिवि-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्याविरुद्धत्यक्तपुनरात्तपरिवृत्तनियमानियमविशेषसामान्यविध्यनुवादत्वान्यर्थस्य ।

८ नानुकरणे ।

९ वक्त्राद्यौचित्ये च ।

१० क्वचिद्गुणः ।

इति तृतीयोऽध्यायः ।

---

१ माधुर्यौजःप्रसादास्त्रयो गुणाः ।

२ द्रुतिहेतुर्माधुर्यं शृङ्गारे ।

३ शान्तकरुणविप्रलम्भेषु सातिशयम् ।

४ तत्र निजाऽन्त्याक्रान्ता अटवर्गा वर्गा ह्रस्वाऽन्तरितौ रणावसमासो मृदुरचना च ।

५ दीप्तिहेतुरोजो वीरबीभत्सरौद्रेषु क्रमेणाधिकम् ।

६ आद्यतृतीयाऽऽक्रान्तौ द्वितीयतुर्यौ युक्तो रेफस्तुल्यश्च टवर्गशषा वृत्तिदैर्घ्यमुद्धतो गुम्फश्चात्र ।

७ विकासहेतुः प्रसादः सर्वत्र ।

८ इह श्रुतिमात्रेणार्थप्रत्यायका वर्णवृत्तिगुम्फाः ।

९ वक्तृवाच्यप्रबन्धौचित्याद्वर्णादीनामन्यथात्वमपि ।

इति चतुर्थोऽध्यायः ।

---

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शब्दालंकाराः ।

१ व्यञ्जनस्यावृत्तिरनुप्रासः ।

२ तात्पर्यमात्रभेदिनो नाम्नः पदस्य वा लाटानाम् ।

३ सत्यर्थेऽन्यार्थानां वर्णानां श्रुतिक्रमैक्ये यमकम् ।

४ तत्पादे भागे वा ।

५ स्वरव्यञ्जनस्थानगत्याकारनियमच्युतगूढादि-चित्रम् ।

६ अर्थभेदभिन्नानां भङ्गाभङ्गाभ्यां युगपदुक्तिः श्लेषः ।

७ अर्थैक्ये द्व्यादिभाषाणां च ।

८ उक्तस्यान्येनान्यथाश्लेषादुक्तिर्वक्रोक्तिः ।

९ भिन्ना कृतेः शब्दस्यैकार्थतेव पुनरुक्ताभासः ।

इति पञ्चमोऽध्यायः ।

---

अर्थालंकाराः ।

१ हृद्यं साधर्म्यमुपमा ।

२ सोपमानोपमेयधर्मोपमावाचकानामुपादाने पूर्णा वाक्ये वृत्तौ च ।

३ एकद्वित्रिलोपे लुप्ता ।

४ असद्धर्मसंभावनमिवादिद्योत्योत्प्रेक्षा ।

५ सादृश्ये भेदेनारोपो रूपकमेकानेकविषयम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



६ इष्टार्थसिद्ध्यै दृष्टान्तो निदर्शनम् ।

७ प्रकृताप्रकृतानां धर्मैक्यं दीपकम् ।

८ सामान्यविशेषे कार्ये कारणे प्रस्तुते तदन्यस्य तुल्ये तुल्यस्य चोक्तिरन्योक्तिः ।

९ व्यङ्ग्यस्योक्तिः पर्यायोक्तम् ।

१० विशेषविवक्षया भेदाऽभेदयोगाऽयोगव्यत्ययोऽतिशयोक्तिः ।

११ विवक्षितस्य निषेध इवोपमानस्याऽऽक्षेपश्चाक्षेपः ।

१२ अर्थानां विरोधाभासो विरोधः ।

१३ सहार्थबलाद्धर्मस्यान्वयः सहोक्तिः ।

१४ श्लिष्टविशेषणैरुपमानधीः समासोक्तिः ।

१५ स्वभावाख्यानं जातिः ।

१६ स्तुतिनिन्दयोरऽन्यतरपरता व्याजस्तुतिः ।

१७ वाक्यस्यार्थनेकार्थता श्लेषः ।

१८ उत्कर्षापकर्षहेत्वोः साम्यस्य चोक्तावनुक्तौ चोपमेयस्याधिक्यं व्यतिरेकः ।

१९ विशेषस्य सामान्येन साधर्म्यवैधर्म्याभ्यां समर्थनमर्थान्तरन्यासः ।

२० स्तुत्यै संशयोक्तिः ससंदेहः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२१ प्रकृताप्रकृताभ्यां प्रकृतापलापोऽपह्नुतिः ।

२२ पर्यायविनिमयौ परावृत्तिः ।

२३ हेतोः साध्यावगमोऽनुमानम् ।

२४ सदृशदर्शनात्स्मरणं स्मृतिः ।

२५ विपर्ययो भ्रान्तिः ।

२६ क्रियाफलाऽभावोऽनर्थश्च विषमम् ।

२७ योग्यतया योगः समम् ।

२८ हेतौ कार्ये चैकत्र हेतुकार्यान्तरोक्तिर्युगपद्गुणक्रियाश्च समुच्चयः ।

२९ पृष्टेऽपृष्टे वान्यापोहपरोक्तिः परिसंख्या ।

३० यथोत्तरं पूर्वस्य हेतुत्वे कारणमाला ।

३१ स्वातन्त्र्याऽङ्गत्वसंशयैकपद्यैरेषामेकत्र स्थितिः संकरः ।

इति षष्ठोऽध्यायः ।

---

१ समग्रगुणः कथाव्यापी नायकः ।

२ शोभाविलासमधुरललितमाधुर्यस्थैर्यगाम्भीर्यौदार्यतेजांस्यष्टौ सत्त्वजास्तद्गुणाः ।

३ दाक्ष्यशौर्योत्साहनीचजुगुप्सोत्तमस्पर्धागमिका शोभा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



४ धीरे गतिदृष्टी सस्मितं वचो विलासः ।

५ मृदुशृङ्गारचेष्टा ललितम् ।

६ क्षोभेप्यनुल्बणं माधुर्यम् ।

७ विघ्नेप्यचलं स्थैर्यम् ।

८ हर्षादिविकारानुपलम्भकृद्गाम्भीर्यम् ।

९ स्वपरेषु दानाभ्युपपत्तिसंभाषणान्यौदार्यम् ।

१० पराऽधिक्षेपाद्यसहनं तेजः ।

११ धीरोदात्तललितशान्तोद्धतभेदात्स चतुर्धा ।

१२ दक्षिणधृष्टानुकूलशठभेदादेकैकश्चतुर्धा ।

१३ गूढगर्वः स्थिरो धीरः क्षमावान् अविकत्थनः महासत्त्वो दृढव्रतो धीरोदात्तः ।

१४ कलासक्तः सुखी शृङ्गारी मृदुर्निश्चिन्तो धीरललितः ।

१५ विनयोपशमवान् धीरशान्तः ।

१६ शूरो मत्सरी मायी विकत्थनश् छद्मवान् रौद्रोऽवलिप्तो धीरोद्धतः ।

१७ ज्येष्ठायामपि सहृदयो दक्षिणः ।

१८ व्यक्तापराधो धृष्टः ।

१९ एकभार्योऽनुकूलः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२० गूढापराधः शठः ।

२१ व्यसनी पापकृल्लुब्धः स्तब्धो धीरोद्धतः प्रतिनायकः ।

२२ तद्गुणा स्वपरसामान्या नायिका त्रेधा ।

२३ स्वयमूढा शीलादिमती स्वा ।

२४ वयःकौशलाभ्यां मुग्धा मध्या प्रौढेति सा त्रेधा ।

२५ धीरा धीराधीरा ऽधीराभेदादन्त्ये त्रेधा ।

२६ षोढापि ज्येष्ठाकनिष्ठाभेदाद् द्वादशधामध्याप्रौढ्योः प्रत्येकं त्रिभेदत्वम् ।

२७ सोत्प्रासवक्रोक्त्या सबाष्पया वाक्यारुष्येण क्रोधिन्यो मध्याधीराद्याः ।

२८ उपचारावहित्थाभ्यामानुकूल्यौदासीन्याभ्यां संतर्जनघाताभ्यां प्रौढाधीराद्याः ।

२९ परोढा परस्त्री कन्या च ।

३० गणिका सामान्या ।

३१ स्वाधीनपतिका प्रोषितभर्तृका खण्डिता कलहान्तरिता वासकसज्जा विरहोत्कण्ठिता विप्रलब्धा अभिसारिका चेति स्वस्त्रीणामष्टावस्थाः ।

३२ अन्त्यत्र्यवस्था परस्त्री ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३३ ईर्ष्याहेतुः सपत्नी प्रतिनायिका ।

३४ सत्त्वजा विंशतिः स्त्रीणामलंकाराः ।

३५ ते चायत्नजाः ।

३६ भावहावहेलास्त्रयोऽङ्गजा अल्पभूयोविकारात्मकाः।

३७ लीलादयो दश स्वाभाविकाः ।

३८ वाग्वेष चेष्टितैः प्रियस्यानुकृतिर्लीला ।

३९ स्थानादीनां वैशिष्ट्यं विलासः ।

४० गर्वादल्पाकल्पन्यासः शोभाकृद्विच्छित्तिः ।

४१ इष्टेऽप्यवज्ञा विव्वोकः ।

४२ वागङ्गभूषणानां व्यत्यासो विभ्रमः ।

४३ स्मितहसितरुदितभयरोषगर्वदुःखश्रमाभिलाष संकरः किलिकिंचितम् ।

४४ प्रियकथादौ तद्भावभावनोत्था चेष्टा मोट्टायितम् ।

४५ अधरादिग्रहाद्दुःखेऽपि हर्षः कुट्टमितम् ।

४६ मसृणोऽङ्गन्यासो ललितम् ।

४७ कर्त्तव्यवशादायते एव हस्तादिकर्मणि यद्वैचित्र्यं स विलासः ।

४८ व्याजादेः प्राप्ताकालस्याप्यवचनं विहृतम् ।

४९ शोभादयः सप्तायत्नजाः ।

५० रूपयौवनलावण्यैः पुंभोगोपबृंहितैर्मन्दमध्यतीव्रा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ङ्गच्छाया शोभा कान्तिर्दीप्तिश्च ।

५१ चेष्टामसृणत्वं माधुर्यम् ।

५२ अचापलाविकत्थनत्वे धैर्यम् ।

५३ प्रश्रय औदार्यम् ।

५४ प्रयोगे निःसाध्वसत्वं प्रागल्भ्यम् ।

इति सप्तमोऽध्यायः ।

---

१ काव्यं प्रेक्ष्यं श्रव्यं च ।

२ प्रेक्ष्यं पाठ्यं गेयं च ।

३ पाठ्यं नाटकप्रकरणनाटिकासमवकारेहामृगडिमव्यायोगोत्सृष्टिकाङ्कप्रहसनभाणवीथीसट्टकादि ।

४ गेयं डोम्बिकाभाणप्रस्थानशिङ्गभाणिकाप्रेरणरामाक्रीडहल्लीसकरासकगोष्ठीश्रीगदितरागकाव्यादि ।

५ श्रव्यं महाकाव्यमाख्यायिका कथा चम्पूरनिबद्धं च ।

६ पद्यं प्रायः संस्कृतप्राकृतापभ्रंशग्राम्यभाषानिबद्धभिन्नान्त्यवृत्तसर्गाश्वाससंध्यवस्कन्धकबन्धं सत्संधिशब्दार्थवैचित्र्योपेतं महाकाव्यम् ।

७ यत्र बीजसमुत्पत्तिर्नानार्थरससंभवा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काव्ये शरीरानुगता तन्मुखं परिचक्षते ॥

८ बीजस्योद्घाटनं यत्र दृष्टनष्टमिव क्वचित् ।
मुखन्यस्तस्य सर्वत्र तद्वै प्रतिमुखं स्मृतम् ॥

९ उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव वा ।
पुनश्चान्वेषणं यत्र स गर्भ इति संज्ञितः ॥

१० गर्भनिर्भिन्नबीजार्थो विलोभनकृतोऽपि वा ।
क्रोधव्यसनजो वापि स विमर्शः प्रकीर्तितः ॥

११ समानयनमर्थानां मुखाद्यानां सबीजिनाम् ।
नानाभावोत्तराणां यद्भवेन्निर्वहणं तु तत् ॥

१२ नायकाख्यातस्ववृत्ताभाव्यर्थशंसिवक्त्रादिः सोच्छ्वासा संस्कृता गद्ययुक्ताख्यायिका ।

१३ धीरशान्तनायका गद्येन पद्येन वा सर्वभाषा कथा ।

१४ गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूः ।

१५ अनिबद्धं मुक्तकादि ।

१६ एकद्वित्रिचतुश्छन्दोभिर्मुक्तकसंदानितकविशेषककलापकानि ।

१७ पञ्चादिभिश्चतुर्दशान्तैः कुलकम् ।

इति अष्टमोऽध्यायः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचिता–

# ॥ अयोगव्यवच्छेदिका ॥

अगम्यमध्यात्मविदामवाच्यं
वचस्विनामक्षवतां परोक्षम् ।
श्रीवर्धमानाभिधमात्मरूप–
महं स्तुतेर्गोचरमानयामि ॥१॥

स्तुतावशक्तिस्तव योगिनां न किं
गुणानुरागस्तु ममापि निश्चलः ।
इदं विनिश्चित्य तव स्तवं वदन्न
बालिशोऽप्येष जनोऽपराध्यति ॥२॥

क्व सिद्धसेनस्तुतयो महार्था
अशिक्षितालापकला क्व चैषा ।
तथापि यूथाधिपतेः पथिस्थः
स्खलद्गतिस्तस्य शिशुर्न शोच्यः ॥३॥

जिनेन्द्र! यानेव विबाधसे स्म
दुरंतदोषान् विविधैरुपायैः ।
त एव चित्रं त्वदसूययेव
कृताः कृतार्थाः परतीर्थनाथैः ॥४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथास्थितं वस्तु दिशन्नधीश !
न तादृशं कौशलमाश्रितोऽसि ।
तुरङ्गशृंगाण्युपपादयद्भ्यो
नमः परेभ्यो नवपण्डितेभ्यः ॥५॥
जगन्त्यनुध्यानबलेन शश्वत्
कृतार्थयत्सु प्रसभं भवत्सु ।
किमाश्रितोऽन्यैः शरणं त्वदन्यः
स्वमांसदानेन वृथा कृपालुः ॥६॥
स्वयं कुमार्गग्लपिता नु नाम
प्रलम्भमन्यानपि लम्भयन्ति ।
सुमार्गगं तद्विदमादिशन्त-
मसूययान्धा अवमन्वते च ॥७॥
प्रादेशिकेभ्यः परशासनेभ्यः
पराजयो यत्तव शासनस्य ।
खद्योतपोतद्युतिडम्बरेभ्यो
विडम्बनेयं हरिमण्डलस्य ॥८॥
शरण्य ! पुण्ये तव शासनेऽपि
संदेग्धि यो विप्रतिपद्यते वा ।
स्वादौ स तथ्ये स्वहिते च पथ्ये
संदेग्धि वा विप्रतिपद्यते वा ॥९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिंसाद्यसत्कर्मपथोपदेशाद–
सर्वविन्मूलतया प्रवृत्तेः ।
नृशंसदुर्बुद्धिपरिग्रहाच्च
ब्रूमस्त्वदन्यागममप्रमाणम् ॥१०॥

हितोपदेशात्सकलज्ञक्लृप्ते–
र्मुमुक्षुसत्साधुपरिग्रहाच्च ।
पूर्वापरार्थेष्यविरोधसिद्धे–
स्त्वदागमा एव सतां प्रमाणम् ॥११॥

क्षिप्येत वान्यैः सदृशीक्रियेत वा
तवाङ्घ्रिपीठे लुठनं सुरेशितुः ।
इदं यथावस्थितवस्तुदेशनं
परैः कथंकारमपाकरिष्यते ॥१२॥

तद्दुःषमाकालखलायितं वा
पचेलिमं कर्म भवानुकूलम् ।
उपेक्षते यत्तव शासनार्थ–
मयं जनो विप्रतिपद्यते वा ॥१३॥

परःसहस्राः शरदस्तपांसि
युगान्तरं योगमुपासतां वा ।
तथापि ते मार्गमनापतन्तो
न मोक्ष्यमाणा अपि यान्ति मोक्षम् ॥१४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनाप्तजाड्यादिविनिर्मितित्व-
संभावनासंभवविप्रलम्भाः ।
परोपदेशाः परमाप्तक्लृप्त-
पथोपदेशे किमु संरभन्ते ॥१५॥

यदार्जवादुक्तमयुक्तमन्यै-
स्तदन्यथाकारमकारि शिष्यैः ।
न विप्लवोऽयं तव शासनेऽभू-
दहो अधृष्या तव शासनश्रीः ॥१६॥

देहाद्ययोगेन सदाशिवत्वं
शरीरयोगादुपदेशकर्म ।
परस्परस्पर्धि कथं घटेत
परोपक्लृप्तेष्वधिदैवतेषु ॥१७॥

प्रागेव देवांतरसंश्रितानि
रागादिरूपाण्यवमान्तराणि ।
न मोहजन्यां करुणामपीश !
समाधिमाध्यस्थ्ययुगाश्रितोऽसि ॥१८॥

जगन्ति भिन्दन्तु सृजन्तु वा पुन-
र्यथा तथा वा पतयः प्रवादिनाम् ।
त्वदेकनिष्ठे भगवन् भवक्षय-
क्षमोपदेशे तु परं तपस्विनः ॥१९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वपुश्च पर्यंकशयं श्लथं च
दृशौ च नासानियते स्थिरे च।
न शिक्षितेयं परतीर्थनाथै-
र्जिनेन्द्र! मुद्रापि तवान्यदास्ताम् ॥२०॥

यदीयसम्यक्त्वबलात् प्रतीमो
भवादृशानां परमस्वभावम्
कुवासनापाशविनाशनाय
नमोऽस्तु तस्मै तव शासनाय ॥२१॥

अपक्षपातेन परीक्षमाणा
द्वयं द्वयस्याप्रतिमं प्रतीमः।
यथास्थितार्थप्रथनं तवैत-
दस्थाननिर्बंधरसं परेषाम् ॥२२॥

अनाद्यविद्योपनिषन्निषण्णै-
र्विशृंखलैश्चापलमाचरद्भिः।
अमूढलक्ष्योऽपि पराक्रिये य-
त्त्वत्किंकरः किं करवाणि देव! ॥२३॥

विमुक्तवैरव्यसनानुबन्धाः
श्रयंति यां शाश्वतवैरिणोऽपि।
परैरगम्यां तव योगिनाथ!
तां देशनाभूमिमुपाश्रयेऽहम् ॥२४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मदेन मानेन मनोभवेन,
क्रोधेन लोभेन च संमदेन।
पराजितानां प्रसभं सुराणां
वृथैव साम्राज्यरुजा परेषाम् ॥२५॥

स्वकण्ठपीठे कठिनं कुठारं
परे किरन्तः प्रलपन्तु किंचित्।
मनीषिणां तु त्वयि वीतराग!
न रागमात्रेण मनोऽनुरक्तम् ॥२६॥

सुनिश्चितं मत्सरिणो जनस्य
न नाथ! मुद्रामतिशेरते ते।
माध्यस्थ्यमास्थाय परीक्षका ये
मणौ च काचे च समानुबंधाः ॥२७॥

इमां समक्षं प्रतिपक्षसाक्षिणा-
मुदारघोषामवघोषणां ब्रूवे।
न वीतरागात्परमस्ति दैवतं
न चाप्यनेकान्तमृते नयस्थितिः ॥२८॥

न श्रद्धयैव त्वयि पक्षपातो
न द्वेषमात्रादरुचिः परेषु।
यथावदाप्तत्वपरीक्षया तु
त्वामेव वीर प्रभुमाश्रिताः स्मः ॥२९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमःस्पृशामप्रतिभासभाजं
भवन्तमप्याशु विविन्दते याः ।
महेम चन्द्रांशुदृशावदाता-
स्तास्तर्कपुण्या जगदीशवाचः ॥३०॥

यत्र तत्र समये यथा तथा
योऽसि सोऽस्यभिधया यया तया ।
वीतदोषकलुषः स चेद्भवा-
नेक एव भगवन्नमोऽस्तु ते ॥३१॥

[ उपसंहारकाव्यम् ]

इदं श्रद्धामात्रं तदथ परनिन्दां मृदुधियो
विगाहन्तां हन्त प्रकृतिपरवादव्यसनिनः ।
अरक्तद्विष्टानां जिनवर ! परीक्षाक्षमधिया-
मयं तत्त्वालोकः स्तुतिमयमुपाधिं विधृतवान् ॥३२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविरचिता-

## ॥ अन्ययोगव्यवच्छेदिका ॥

अनन्तविज्ञानमतीतदोष-
मबाध्यसिद्धान्तममर्त्यपूज्यम् ।
श्रीवर्धमानं जिनमाप्तमुख्यं,
स्वयम्भुवं स्तोतुमहं यतिष्ये ॥१॥

अयं जनो नाथ! तव स्तवाय
गुणान्तरेभ्यः स्पृहयालुरेव ।
विगाहतां किन्तु यथार्थवाद-
मेकं परीक्षाविधिदुर्विदग्धः ॥२॥

गुणेष्वसूयां दधतः परेऽमी
मा शिश्रियन्नाम भवन्तमीशम् ।
तथापि संमील्य विलोचनानि
विचारयन्तां नयवर्त्म सत्यम् ॥३॥

स्वतोऽनुवृत्तिव्यतिवृत्तिभाजो
भावा न भावान्तरनेयरूपाः ।
परात्मतत्त्वादतथात्मतत्त्वाद्
द्वयं वदन्तोऽकुशलाः स्खलन्ति ॥४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदीपमाव्योम समस्वभावं
स्याद्वादमुद्रानतिभेदिवस्तु ।
तन्नित्यमेवैकमनित्यमन्य-
दिति त्वदाज्ञाद्विषतां प्रलापाः ॥५॥
कर्तास्ति कश्चिद् जगतः स चैकः
स सर्वगः स स्ववशः स नित्यः ।
इमाः कुहेवाकविडम्बनाः स्यु-
स्तेषां न येषामनुशासकस्त्वम् ॥६॥
न धर्मधर्मित्वमतीवभेदे
वृत्त्यास्ति चेन्न त्रितयं चकास्ति ।
इहेदमित्यस्ति मतिश्च वृत्तौ
न गौणभेदोऽपि च लोकबाधः ॥७॥
सतामपि स्यात् क्वचिदेव सत्ता
चैतन्यमौपाधिकमात्मनोऽन्यत् ।
न संविदानन्दमयी च मुक्तिः
सुसूत्रमासूत्रितमत्वदीयैः ॥८॥
यत्रैव यो दृष्टगुणः स तत्र
कुम्भादिवन्निष्प्रतिपक्षमेतत् ।
तथापि देहाद् बहिरात्मतत्त्व-
मतत्त्ववादोपहताः पठन्ति ॥९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वयं विवादग्रहिले वितण्डा-
पाण्डित्यकण्डूलमुखे जनेऽस्मिन् ।
मायोपदेशात् परमर्मभिन्दन्
अहो ! विरक्तो मुनिरन्यदीयः ॥१०॥

न धर्महेतुर्विहितापि हिंसा
नोत्सृष्टमन्यार्थमपोद्यते च ।
स्वपुत्रघातान्नृपतित्वलिप्सा-
सब्रह्मचारिस्फुरितं परेषाम् ॥११॥

स्वार्थावबोधक्षम एव बोधः
प्रकाशते नार्थकथान्यथा तु ।
परे परेभ्यो भयतस्तथापि
प्रपेदिरे ज्ञानमनात्मनिष्ठम् ॥१२॥

माया सती चेद् द्वयतत्त्वसिद्धि-
रथासती हन्त कुतः प्रपंचः ।
मायैव चेदर्थसहा च तत्किं
माता च वन्ध्या च भवत्परेषाम् ॥१३॥

अनेकमेकात्मकमेव वाच्यं
द्वयात्मकं वाचकमप्यवश्यम् ।
अतोऽन्यथा वाचकवाच्य-
क्लृप्तावतावकानां प्रतिभाप्रमादः ॥१४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिदर्थशून्या च जडा च बुद्धिः
शब्दादितन्मात्रजमम्बरादि ।
न बन्धमोक्षौ पुरुषस्य चेति
कियज्जडैर्न ग्रथितं विरोधि ॥१५॥
न तुल्यकालः फलहेतुभावो
हेतौ विलीने न फलस्य भावः ।
न संविदद्वैतपथेऽर्थसंविद्
विलूनशीर्णं सुगतेन्द्रजालम् ॥१६॥
विना प्रमाणं परवन्न शून्यः
स्वपक्षसिद्धेः पदमश्नुवीत ।
कुप्येत्कृतान्तः स्पृशते प्रमाण-
महो सुदृष्टं त्वदसूयिदृष्टम् ॥१७॥
कृतप्रणाशाकृतकर्मभोग-
भवप्रमोक्षस्मृतिभङ्गदोषान् ।
उपेक्ष्य साक्षात् क्षणभङ्गमिच्छ-
न्नहो महासाहसिकः परस्ते ॥१८॥
सा वासना सा क्षणसन्ततिश्च
नाभेदभेदानुभयैर्घटेते ।
ततस्तटादर्शिशकुन्तपोत-
न्यायात्त्वदुक्तानि परे श्रयन्तु ॥१९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विनानुमानेन पराभिसन्धि-
मसंविदानस्य तु नास्तिकस्य ।
न साम्प्रतं वक्तुमपि क्व चेष्टा
क्व दृष्टमात्रं च हहा प्रमादः ॥२०॥

प्रतिक्षणोत्पादविनाशयोगि-
स्थिरैकमध्यक्षमपीक्षमाणः ।
जिन ! त्वदाज्ञामवमन्यते यः
स वातकी नाथ ! पिशाचकी वा ॥२१॥

अनन्तधर्मात्मकमेव तत्त्व-
मतोऽन्यथा सत्त्वमसूपपादम् ।
इति प्रमाणान्यपि ते कुवादि-
कुरङ्गसंत्रासनसिंहनादाः ॥२२॥

अपर्ययं वस्तु समस्यमान-
मद्रव्यमेतच्च विविच्यमानम् ।
आदेशभेदोदितसप्तभङ्ग-
मदीदृशस्त्वं बुधरूपवेद्यम् ॥२३॥

उपाधिभेदोपहितं विरुद्धं
नार्थेष्वसत्त्वं सदवाच्यते च ।
इत्यप्रबुध्यैव विरोधभीता
जडास्तदेकान्तहताः पतन्ति ॥२४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्यान्नाशि नित्यं सदृशं विरूपं
वाच्यं न वाच्यं सदसत्तदेव ।
विपश्चितां नाथ ! निपीततत्त्व-
सुधोद्गतोद्गारपरम्परेयम् ॥२५॥

य एव दोषाः किल नित्यवादे
विनाशवादेऽपि समास्त एव ।
परस्परध्वंसिषु कण्टकेषु
जयत्यधृष्यं जिन ! शासनं ते ॥२६॥

नैकान्तवादे सुखदुःखभोगौ
न पुण्यपापे न च बन्धमोक्षौ ।
दुर्नीतिवादव्यसनासिनैवं
परैर्विलुप्तं जगदप्यशेषम् ॥२७॥

सदेव सत् स्यात्सदिति त्रिधार्थो
मीयेत दुर्नीतिनयप्रमाणैः ।
यथार्थदर्शी तु नयप्रमाण-
पथेन दुर्नीतिपथं त्वमास्थः ॥२८॥

मुक्तोऽपि वाभ्येतु भवं भवो वा
भवस्थशून्योऽस्तु मितात्मवादे ।
षड्जीवकायं त्वमनन्तसङ्ख्य-
माख्यस्तथा नाथ ! यथा न दोषः ॥२९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्योऽन्यपक्षप्रतिपक्षभावाद्
यथा परे मत्सरिणः प्रवादाः ।
नयानशेषानविशेषमिच्छन्
न पक्षपाती समयस्तथा ते ॥३०॥

वाग्वैभवं ते निखिलं विवेक्तु-
माशास्महे चेन्महनीयमुख्य ! ।
लङ्घेम जङ्घालतया समुद्रं
वहेम चन्द्रद्युतिपानतृष्णाम् ॥३१॥

[ उपसंहारकाव्यम् ]

इदं तत्त्वाऽतत्त्वव्यतिकरकरालेऽन्धतमसे
जगन्मायाकारैरिव हतपरहा ! विनिहितम् ।
तदुद्धर्तुं शक्तो नियतमविसंवादिवचन-
स्त्वमेवातस्त्रातस्त्वयि कृतसपर्याः कृतधियः ॥३२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ❀ पुस्तकप्राप्तिस्थानम् । ❀

**श्री ऋषभदेवजी छगनरामजी की पेढी.**

**ठि. श्री सिद्धचक्राराधनतीर्थ,**

**दहेरा खिड़की, खाराकुवा;**

**उज्जैन** (मालवा–C. I.).

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

gyanmandir@kobatirth.org
081116
Serving JinShasan

For Private and Personal Use Only